CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S-D-P-B

Coll. No. 516

Title Tattitiyopanisat-
bhasya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No. : 816 Subject : Vedic lit.

Title : Taittirīyopaniṣat bhāṣya.

Author : Śaṅkarācārya Scribe : —

Date of the work : — Date of the Ms. : V.S. 1935

Place of the work : — Place of the Ms. : —

Size : 8.4" by 4.5" Extent : 45 fol.

Language : Sanskrit Script : Devanāgarī

Remarks : —

तैत्तरीयोपनिषत्समाप्ता॥८

स्वामिमाधवानंदसेदंपुस्तकं

रा. ब्र. भ.

१ १७ ३५

॥श्रीगणेशायनमः॥ वादग्रंथं विहायादौतैत्तिरीयार्थवर्णनंमं
दजिज्ञासुबोधार्थंभाष्यतोलिखितंमया॥१॥यस्माज्जातंजगत्स
र्वंयस्मिन्नेवविलीयते।येनेदंधार्यतेचैवतस्मैज्ञानात्मनेनमः।
२।तैत्तिरीयकसारस्यमयाचार्यप्रसादतः।स्पष्टार्थरुचिसंत्रीत्यै
ह्यरब्धेयंसंग्रहूणीयते।३।नित्यान्यधिगतानिकर्माण्युपात्तदुरित
क्षयार्थानिकर्म्माण्यानिचफलार्थिनांसर्वस्मिन्ग्रंथे।इदानींकर्मो
पादानहेतुनिष्टस्यंब्रह्मविद्याप्रस्तूयते।कामहेतुःकामःस्यात्प्रव
र्त्तकत्वात्।आप्तकामानांहिकामात्मावेस्वात्मन्यवस्थानात्प्रवृत्ते
रुपपत्तिः।आत्मकामवेचाप्तकामता।आत्माहिब्रह्मतद्धिरोहिपर

प्राप्तिंवक्ष्यत्यतोऽविद्यानिवृत्तौस्वात्मन्यवस्थानंपरप्राप्तिः।अभयं
प्रतिष्ठांविंदतइत्यादिश्रुतेः।काम्यनिषिद्धयोरनारंभादारब्धस्य
चोपभोगेनक्षयान्नित्यानुष्ठानेनप्रत्यवायाभावात्।अयमतएव
स्वात्मन्यवस्थानमोक्षइतिब्रह्मविद्यार्थोपनिषदारभ्यते।उपनिष
दितिविद्योच्यतेतच्छीलिनांगर्भजन्मजरादिनिशातनात्।ब्रह्मणो
वोपनिगमयितृत्वादुपनिषत्तत्परंश्रेयइतितदर्थत्वाद्ग्रंथोप्युपनि
षत्।।शांतुरवंप्राणवृत्तेरक्ष्यभिमानीवृतात्माततोऽयानवृत्तेः
रात्रेश्चाभिमानीवरुणश्चक्षुष्यादित्येचाभिमान्यर्मावलेइंनो
वाचिबुद्धौचबृहस्पतिर्विष्णुरुरुक्रमोविस्तीर्णक्रमःपादयोर
भिमानी।एवमाद्यात्मदेवतास्माकंशांतुरवक्त्रीभवत्विति

सर्वानुषंगि।तास्तु हिरण्यवक्त्वविद्याश्रवणधारणोपयोगाअप्र
तिबंधेनभविष्यंतीतितत्फलवक्त्वंप्रार्थ्यते।ब्रह्मविदिदिषुणानम
स्कारब्रह्मवदनक्रियेवायुविषयेब्रह्मविद्योपसर्गत्वंत्यर्थंक्रि
येते।सर्वक्रियाफलानांतदधीनत्वात्।ब्रह्मवायुरस्मेब्रह्मणेन
मःप्रह्वीभावंकरोमीतिवाक्यशेषःनमस्तेतुभ्यंहेवायोनमस्का
रोमीतिपरोक्षप्रत्यक्षाभ्यांवायुरेवाभिधीयते।किंचत्वमेवप्रत्य
क्षंचक्षुराद्यपेक्ष्यबाह्यंसंनिकृष्टमव्यवहितंप्रत्यक्षंब्रह्मासि
यस्मात्तस्मात्त्वामेवप्रत्यक्षंब्रह्मवदिष्यामिऋतंयथाशास्त्रंकर्म
अंबुवौस्तुपरिनिश्चितमर्थंतदपित्वदधीनत्वात्त्वमेववदिष्यामि
ति।सएववाक्कायाभ्यांसंपद्यमानोर्थःसोपित्वदधीनएवसंप

द्यतइतित्वामेवसत्यंवदिष्यामि।तत्सर्वात्मकंवाक्षारंब्रह्ममयमेवं
स्तुतंसत्प्रार्थिनमवदुविद्यासंनियोजनेन।तदेवब्रह्मवक्का
रमाचार्यवक्त्वसामर्थ्यसंयोजनेनावदुमामवदुवक्तारमिति
उनर्वचनंमादरार्थंशांतिःत्रिर्वचनमाध्यात्मिकाधिभौतिका
धिदैविकानांविघ्नानांव्युपसर्गाणांप्रशमनार्थंअर्थस्यानन्यधानत्वादुपनि
षदोग्रंथपावेयत्नोपरमोमाभूदितिशिक्षाध्यायआरभ्यतेशीक्षाशी
क्ष्यतेऽनयावर्णादुच्चारणलक्षणमितिशीक्ष्यतइतिवाशीक्षावर्णादयः
।दैर्घ्यंछांदसंतांशीक्षांव्याख्यास्यामोविस्पष्टमाक्षरंतांवक्ष्यामः
तत्रवर्णोऽकारादिःस्वरउदात्तादिर्मात्राह्रस्वाद्याबलंप्रयत्नविशेषःसामवर्णो

नांमध्यमहस्योच्चारणंसंतानःसंततिःसंहितेत्यर्थः।एषहिशिक्षितव्योर्थः
शिक्षायस्मिन्नध्यायेसोयंशिक्षाध्यायइत्येवमुक्तउपसंहारउत्तरार्थः
अधुनासंहितोपनिषदुच्यतेतत्रसंहिताद्युपनिषत्परिज्ञाननिमित्तंयश्च
ब्रूःत्रार्थ्यतेतन्नोआवयोःशिष्याचार्ययोःसहैवास्तुतन्निमित्तंचयत्किञ्च
वर्चसंतेजःतच्चसहैवास्तुइतिशिष्यवचनमाशीः।अथानंतरंअध्यय
नलक्षणविधानस्यसर्वत्रस्ययतोत्यर्थंग्रंथनाविताबुद्धिर्नशक्यते ३
सहसार्थज्ञानविषयेवतारयितुमित्यतःसंहितायाउपनिषदंसंहिता
विषयंदर्शनमित्यर्थः।ग्रंथसंनिकृष्टमेवव्याख्यास्यामः।पंचस्वधिक
रणेष्वाश्रयेषुज्ञानविषयेषु।कानितानीसाधिलोकंचाधियज्ञं

१ लोक

नंतरधिलोकंतथाधिज्यौतिषमधिविद्यमधिप्रजमध्यात्ममितितारतः
पंचैषयाउपनिषदोलोकादिमहावस्तुविषयत्वात्संहिताविषयत्वाच्च
महत्यश्चताःसंहिताइत्याचक्षतेकथयंतिब्रह्मविदः।अथतासांयथोपन्य
स्तानामधिलोकंदर्शनमुच्यते।दर्शनक्रमविवक्षार्थोयंशब्दःसर्वत्रापृथिवी
सर्वरूपंसर्वोवर्णःसर्वरूपंसंहितायाःसर्वोवर्णोपृथिवीदृष्टिःकर्त्तव्येत्युक्तं
भवतितथाद्यौरुत्तररूपंआकाशोंतरिक्षलोकःसंधिर्मध्यंसर्वोत्तररूपयोः।
संधीयतेस्मिन्सर्वोत्तररूपेइतिसंधिः।वायुःसंधानंसंधीयतेनेनेति।इत्यधि
लोकंदर्शनमुक्तं।अथाधिज्यौतिषमित्यादिसमानं।इतीमाइत्युक्ताउप
प्रदर्शंतेत्यःकश्चिदेवमेतामहासंहिताम्आख्यातावेदोपनिषत्तांवेदेत्युपासनं

स्याविज्ञानाधिकारादितिप्राचीनयोग्योपास्येतिवचनादुपासनंचयथा
शास्त्रंतुल्यप्रत्ययसंततिरसंकीर्णाचान्यप्रत्ययैरास्वाक्तालंबनवि
षयाचात्रसिद्ध्योपासनशब्दार्थोलोकेगुरुंप्राप्ते॥योहिगुर्वादीन्संत
तमुपचरतिसउपास्त इत्युच्यतेसचफलमाप्नोत्युपासनस्यातोत्रापि
चयएवंवेदसंधीयतेप्रजादिभिःस्वर्गांतैःप्रजादिफलमाप्नोतीत्यर्थः
।यश्छंदसामितिमेधाकामस्यश्रीकामस्यचतत्प्राप्तिसाधनंजपहोमावु
च्येते।यःछंदसांवेदानांऋषभइवऋषभःप्राधान्यात्।विश्वरूपःसर्वरू
पःसर्ववाङ्मातेस्तद्यथाशंकुनेत्यादिश्रुत्यंतरादतएवऋषभत्वंचोंका
रस्यहंकारोत्रोपास्यइतिऋषभादिशब्दैःस्तुत्यर्थायैवोंकारस्य।छंदो



भ्योवेदेभ्योवेदात्यमृतंतस्मादमृतादधिसंबभूवलोकदेववेदमाहु
तिन्यःसारिष्ठंजिघृक्षोःप्रजापतेस्तपस्यतउंकारःसारिष्ठत्वेनप्रत्यनाद
त्यर्थः।नहिनित्यस्योंकारस्यांजसैवोत्पत्तिरवकल्प्यतेसएवंभूतउंका
रइंद्रःसर्वकामेशःपरमेश्वरोमांमांमेधयाप्रज्ञयास्पृणोत्पूरयतु(श्रीलयतु)बलयतुवा
प्रज्ञाबलंहिप्रार्थ्यतेऽमृतस्यामृतत्वहेतुब्रह्मज्ञानस्यतदधि
कारात्।हेदेवंधारणोधारयितानूयासंभवेयं।किंचशरीरंमेममविच
र्षणंविचक्षणंयोग्यंभूयात्उरुषभत्ययः।जिह्वामेमधुमत्तमाऽतिश
येनमधुरभाषिणीकर्णाभ्यांश्रोत्राभ्यांभूरिबहुविश्रवंव्यश्रवंश्रोत्री
भूयासं।आत्मज्ञानयोग्यःकार्यकारणसंघातोऽस्त्वितिवाक्यार्थःमेधाचि

तदर्थमेव प्रार्थ्यते। ब्रह्मणः परमात्मनः कोऽसि असेरिवोपलब्धिः ब्रह्म
नत्वात्त्वं हि ब्रह्मणः प्रतीकत्वयि ब्रह्मोपलभ्यते। मेधया लौकिक प्रज्ञया पि
हित आच्छादितः सामान्यज्ञैरविदिततत्त्व इत्यर्थः। ऋतं श्रवणस्मर्वक
मात्मज्ञानादिकं मे गोपाय रक्ष तत्प्रत्यविस्मरणादि कुर्वित्यर्थः। जपार्था
एते मंत्रा मेधाकामस्य। श्रीकामस्य होमार्थास्त्वधुनोच्यंते मंत्राः आव
हन्त्यानयंतीवितन्वाना विस्तारयंती कुर्वाणा निर्वर्तयंती अचीरं अचि
रक्षियं कुर्वाणा आत्मनो मम। किमित्याह॥ वासंसि च स्त्राणि मम गात्रा
अन्नपाने च सर्वदा एवमादीनि कुर्वाणा श्रीर्यान्ती श्रियंतो मेधा निर्व
र्त्तनात्परामावहन्त्यानयन्त्यमेधसो हि श्रीरनर्थायैवेति किंचिन्निष्टं



होमशाम जाप्यादि युक्तामन्यैश्चपशुनिःसहयुक्तामावहेत्यधिकारा
दोंकारएवान्निसंबध्यते। स्वाहास्वाहाकारो होमार्थमंत्रांत पनार्थमं
त्रांतज्ञापनार्थः। आयांतुमामितिमवद्भिर्नसंबंधो ब्रह्मचारिणः यशो
यशस्विजनेजनसमूहे ऽसानिन्न वानिश्रेयान्त्रशस्यतरःव
स्यसोवरीयसोवस्तुमन्नराद्धाऽसानि। किंचतंब्रह्मणः कोऽस्यतत्वात्त्वंहे
नगवन्भूजावन्त्रविशानि। प्रविश्यचानन्यस्त्वदात्मैवभवानीत्यर्थः। स
त्वमपिमामंनगवन्भूजावन्त्रविशआवयोरेकत्वमेवास्तु। तस्मिंस्त्वयिस
हस्त्रशारवेबकुन्नेदेनिम्नजेऽहंशोधयामियापकृत्या। यथालोकेआपः
प्रवताप्रवणावानिम्नवतादेशेनयंतिगछंति। यथाचमासाअहर्जरं। संव

त्सरोऽअहर्जरोऽहोनिः परिवर्त्तमानो लोकान्जरयतिइतिऽअहानिवा
ऽस्मिन्जीर्यंत्यंतर्भवंतीत्यहर्जरस्तंच यथामासायंत्येवंब्रह्मचारिणः
हेधातःसर्वस्य [illegible] विधातर्मामायंतुऽआगछंतुसर्वतःसर्वदि
शः।प्रतिवेशःश्रमंपनयनस्थानंऽआसन्नगृहमित्यर्थः एवंत्वंप्रतिवेशत्व
च्छीलिनांसर्वपापदुःखापनयनस्थानमसि।अतोमांप्र[illegible]तिग्रहा[illegible]हि
प्रकाशयात्मानंप्रपद्यस्वचमांरसविद्रुमिवलोहंत्वन्मयंत्वदात्मानंकु
र्वित्यर्थः श्रीकामोस्मिन्विद्याप्रकरणेनिधीयमानोधनार्थःधनंचकर्मार्थक
र्मचोपात्तदुरितक्षयार्थंतत्क्षयेहिविद्याप्रकाशतोतयाचस्मृतिःज्ञानमु
त्पद्यतेऽसंक्षयात्पापस्यकर्मणःयथादर्शतलप्रख्येपश्यंत्यात्मानमा

त्मनि[illegible]ति।संहितोपासनमुक्तंतदनुमेधाकामस्येमेश्रीकामस्य
चमंत्राऽअनुक्रांताःतेचपारंपर्येणविद्योपयोगार्थाएव।अनंतरंमाहत्या
त्मनोब्रह्मणोंतरूपासनंस्वाराज्यफलंप्रस्तूयते।भूर्भुवःस्वरितीत्युक्त
प्रत्याहार्थःएतास्तिस्रइतिप्रदर्शितानांपरामर्शःपरामृशःस्मार्यंतेवैऽ
त्यनेनतिस्रएताःप्रसिद्धाऽआहृतयःस्मार्यंते।तासामियंचतुर्थीव्याहृति
र्महइतितासामेतांचतुर्थींमहाचमसस्यापत्यंमाहाचमस्यःप्रवेदयतेऽ
हमस्मइत्येतेषांदृष्टानुकथनार्थत्वात्।विदितवान्ददर्शेत्यर्थःमहाच
मस्यग्रहणमार्षार्थानुस्मरणार्थंऋष्यनुस्मरणमप्युपासनांगमि
तिगम्यते।इहोपदेशात्।येयंमहाचमस्येनदृष्टाव्याहृतिर्महइतितां

ब्रह्मभूर्भुवःस्वरिति ब्रह्म महश्चाहुतिः। किंपुनस्तत्सत्यमात्मा। आप्नोतेर्वा
प्तिकर्मणः आप्तमाहुतयोलोकादेवावेदाः प्राणाश्चमह इ
त्येनेनमाहुत्यात्मनाआदित्यचंद्र ब्रह्मान्नभूतेनव्याप्यंतेयतोऽतो
गानिअवयवाअन्यादेवता। देवताग्रहणमुपलक्षणार्थंलोकादीनां
।मह इत्येतस्यआहुत्यात्मनोदेवलोकादयश्चसर्वेऽवयवभूताआहु
दित्यादिनिर्लोकादयोमह्यंतइत्यात्मनाअंगानिमह्यंतेमह नंहृद्भिरु
पचयोमह्यंतेवर्धंतइत्यर्थः। त्रयंलोकः १अग्निः २ऋग्वेदः ३प्राणः ४प्र
थमाव्याहृतिर्भूःएवमुत्तरोत्तराएकैकाचउर्ध्वाभवति। महइतिब्रह्मब्रह्मे
त्योंकारः। शब्दाधिकारेन्यस्यानावात्। ऊर्ध्वार्थमन्यत्। तावाएताश्चतस्र



श्चतस्रोवैतिताएतामूर्भुवःस्वर्महइतिचतस्रएकैकशश्चतुर्धाचतुः
प्रकाराधाशब्दःप्रकारवचनःचैवंस्रश्चतस्रः सत्यश्चतुर्धाभवंतीत्यर्थः
।तासांयथाक्रमानांउनरूपदेशस्तथैवोपासननियमार्थः। तायथोक्ताव्याह
तीर्योवैदसवेदविजानातिकिंब्रह्मासर्वेदेवाअस्मैएवंविदुषेंगभूताआव
हंत्यानयंतिबलिंस्वाराज्यप्राप्तौसत्यां। भूर्भुवःस्वःस्वरूपामहइत्येतस्य
व्याहृत्यात्मनोब्रह्मणोंगान्यन्यादेवताइत्युक्तं। यस्यताअंगभूतास्तस्यैतस्य
ब्रह्मणःसाक्षादुपलब्ध्यर्थंउपासनार्थंचतद्दयाकाशंस्थानमुच्यते। आ
त्मन्याकाशइवविस्तीर्णः तस्मिन्हितद्ब्रह्मोपास्यमानंमनोमयत्वादि धर्मविशिष्टं
साक्षादुपलभ्यतेपाणिविधामलकं। मार्गश्चसर्वात्मभावप्रतिपत्तयेवक्ष्यइ

नुवाकमारभ्यते। सइतिशुक्रमायंशरूषइत्येतेनसंबध्यते। यएषोंतर्हृदयेहृदयस्यांतरंतर्हृदयमितिशुंडरीकाकारोमांसपिंडःप्राणायतनो ऽनेकनाडीसुषिरऊर्ध्वनालोऽधोमुखेविशस्यमानेपशौप्रसिच्यउपलभ्यते तस्यांतरेणयआकाशःप्रसिच्यएवकरकाकाशवत्। तस्मिन्सोयंशरूषःशरिराय नात्। शरणाच्चास्यरादयोलोकायेतिशरूषो। मनोमयोमनोविज्ञानंमनुतेऽनेनकर्मणाःतन्मयस्तत्प्रायस्तदुपलब्धत्वात्। मनुतेनेनेतिवामनोंतःकरणंतदभिमानीतन्मयःतद्विंगोवा। अमृतोऽमरणधर्मा। हिरण्मयोज्योतिर्मयस्तस्यैवंलक्षणस्यहृदयाकाशेसाक्षात्कृतस्यविधुषआत्मनृतस्यब्रह्मणःस्वरूपप्रतिपत्तयेमार्गोनिधीयते। हृदयाऊर्ध्वं

प्रहृत्यसुषुम्णानामनाडीयोगशास्त्रेप्रसिद्धा। साचांतरेणमध्येप्रसिद्धेतालुके। तालुकयोर्गतोयश्चैषतालुकयोर्मध्येस्तनइवावलंबतेमांसरज्जुरूपस्तस्यचांतरेणेत्येतत्। यत्रकेशांतःकेशानामंतोवसानंमूलंकेशानांतोविवर्त्ततेविभागेनवर्त्ततेमूर्द्धप्रदेशइत्यर्थः। तंदेशंप्राप्यतत्रविनिःसृताभित्त्वाविभज्यविदार्यशीर्षकपालेनिर्गतायासाइंद्रयोनिर्मार्गःस्वरूपप्रतिपत्तिद्वारमित्यर्थः। तयैवविद्वान्मनोमयात्मदर्शीमूर्ध्नोविनिष्क्रम्यास्यकालेस्याधिष्ठातारंरितिव्याहृतिरूपोयाग्निर्मरुतोब्रह्मणोंगभूतस्तस्मिन्नस्तेप्रतिपत्तिमभ्यात्मनेमंप्राप्नोतीत्यर्थः। तथाचवइतिद्वितीयमाहृत्यात्मनिवायोःप्रतिपत्तीत्यनुवर्त्तते।

स्तु वरितितृतीयव्यृत्यात्मनि आदित्ये। मरुद्भ्यांगिनिश्चतुर्थ्या
तृत्यात्मनिप्रतिष्ठितीतेषात्मनावेनोषित्वा आप्नोति अस्मन्मृतः स्वा
राज्यंस्वराड्भावंस्वयमेवराजाधिपतिर्भवति अंगन्मृतानांदेवानां
यथाब्रह्मादेवाश्चसर्वेऽस्मेबलिमावहंतिअंगन्मृतायथाब्रह्मणे
। आप्नोतिमनसस्पतिं। सर्वेषांमनसांपतिःसर्वात्मकत्वाब्रह्मणः
सर्वैर्हिमनोभिस्तन्मनुतेतदाप्नोत्येवविद्वान्। किंचवाक्पतिः सर्वा
सांवाचांपतिर्भवति। तथाचक्षुष्पतिःश्रोत्राणांविज्ञानानांचपतिः
सर्वात्मकत्वात्सर्वेषाणिनांकरणोस्तद्वान्भवतीत्यर्थः। किंचत
तोप्यधिकतरमेतन्मरुत्वति। किंतदुच्यते। आकाशशरीरं आकाशः श

रीरमस्य। आकाशवद्यास्मन्मशरीरमस्येत्याकाशशरीरं किंतत्त्व
क्तंब्रह्म। सत्यात्मसत्यंमूर्त्तामूर्त्तमवितथस्वरूपमात्मास्वाभावोस्य
तदिदंसत्यात्मा प्राणारामंप्राणेधारमणमाक्रीडायस्यतत्प्राणानां
वाआरामोयस्मिंस्तत्। मनआनंदआनंदन्मृतंस्वरूपंदेवस्येये
मनस्तन्मनआनंदंशांतिरूपंशमस्तत्समरुद्। शांत्यावासमरुद्वत्तु
पलभ्यतइतिशांतिसमरुद्। अमृतममरणधर्मिएतच्चाधिकमरैर्विशे
षणं। तत्रैवमनोमयइत्यादिद्रष्टव्यं। इत्येवंमनोमयत्वादिधर्मैर्वि
शिष्टंयथोक्तंब्रह्मप्रतीनयोग्यउपास्य। इत्याचार्यवचनोक्तिरा
दरार्था। उक्तस्तुपासनाशब्दार्थः। यदेतदित्यादेत्यात्मकंब्रह्मोपास्यमु

क्तं तस्यैवशथिल्यादिपांक्तस्वरूपेणोपासनमुच्यते। पंचसंख्यायो
गात्पंक्तिछंदः संपत्तिस्ततः पांक्तत्वंसर्वस्यापांक्तज्ञेयं। पंचपदापंक्तिः
पांक्तोयज्ञइतिश्रुतेः। तेनयत्सर्वंलोकाद्यात्मांतंचपांक्तंपरिकल्पयति
यज्ञमेवतत्परिकल्पयतितेनयज्ञेनपरिकल्पितेनपांक्तात्मकंत्रिवृत्प्रा
तिमदनिसंपद्यते। तत्कथंसर्वंपांक्तमिदंयत्तआह। इदथिल्यंतरिक्षंद्यौ
र्दिशोवांतरदिशाइतिलोकपांक्तं। अग्निर्वायुरादित्यश्चंद्रमानक्षत्रा १०
णीतिदेवतापांक्तं। आपओषधयोवनस्पतयआकाशआत्मेतिभूत
पांक्तंआत्मेतिविराड्भूताधिकारात्। इत्यधिभूतमित्यधिलोकाधिदैव
तपांक्तक्रयोपलक्षणार्थंलोकदेवतापांक्तयोश्चान्निहितत्वात्। अथा

नंतरमध्यात्मंपांक्तत्रयमुच्यतेप्राणादिवाग्वांक्तं। चक्षुरादींद्रियपांक्तं
चर्माद्यधिष्ठानपांक्तंएतावदिदंसर्वमध्यात्मं। बाह्यंचपांक्तमेवेत्येत दे
वमधिविधायपरिकल्प्यऋषिर्वेदः एतद्दर्शनसंपन्नोवामदेवऋषिरवो
चदृक्तवान्। किमित्याहपांक्तंवाइदंसर्वंपांक्तेनैवाध्यात्मिकेन संख्या
सामान्यात्पांक्तंवाव्यंस्नुतेतिबलयतिस्तरयतिएकात्मतयोपलभतेइ
त्येतदेवंपांक्तमिदंसर्वमितियोवेदसप्रजापत्यात्मैवभवतीत्यर्थः। व्याह
त्यात्मनोब्रह्मणउपासनमुक्तं। अनंतरंचपांक्तस्वरूपेणेदानींसर्वोपा
सनांगभूतस्योंकारस्योपासनंविधित्स्यते। परापरब्रह्मदृष्ट्यात्युपास्यमा
नओंकारःशब्दमात्रोपिपरापरब्रह्मप्राप्तिसाधनंभवतिसत्यालंबनंब्र

ज्ञाणः परस्या परस्यच्च प्रतिमेव विद्मः एतेनैवायतनेनैकतरमन्वेती
तिश्रुतेः।ॐमितीतिशब्दः स्वरूपपरिछेदार्थः।ॐमित्येतच्छब्दरूपंब्रह्मेति
मनसाधारयेदुपासीतयतॐमितीदंसर्वंसर्वंहिशब्दरूपमोंकारेणाव्या
प्तंतद्यथाशकुनेतिश्रुत्यंतरात्।अभिधानसंबन्धन्यिधेयमित्यतइदं
सर्वमोंकारइत्युच्यते।ॐकारस्तुत्यर्थउत्तरोग्रंथउपास्यत्वात्तस्य।ॐमित्ये
तदनुकृतिरनुकरणंकरोमियास्यामिचेतिकृतमनुकरोमोमित्यनुकरोत्य
न्योऽतॐकारोनुकृतिःहस्मवैइतिब्रूसिद्धावद्योतकाःब्रूसिस्तुत्वोंकारस्या
नुकृतित्वं।अपिचॐश्रावयेतिप्रेषपूर्वकंआश्रावयंतिश्रावयंतित्रयोमिति
सामानिगायंतिसामगाः।ॐमितिशस्त्राणिशंसंतिशंसितारःतयोमित्यध्वर्युः

प्रतिगरंप्रतिगृणातिॐमितिब्रह्माप्रसौत्यनुजानाति।ॐमित्यग्निहोत्र
मनुजानातिमुहोमीत्युक्तेमित्येवानुजानातियच्छति।ॐमित्येवब्रह्मणःप्र
वक्ष्यन्प्रवचनंकरिष्यन्ब्रूमध्येष्यमाणॐमित्येवाहॐमितिप्रतिपद्यतेऽधेतु
मित्यर्थः।ब्रह्मवेदंउपाप्नवानीतिप्राप्नुयांयद्धि व्यामीतिउपाप्नोत्येवब्रह्म।
अथवाब्रह्मपरमात्मानमुपाप्नवानीआत्मानंप्रवक्ष्यन्प्रापयिष्यन्नोमित्येवा
हसचेतनोंकारेणब्रह्मप्राप्नोत्येव।ॐकारस्सर्वकर्मप्रवृत्तानांक्रियाणांफल
वत्त्वंयस्मात्तस्मादोंकारंब्रह्मत्युपासीतेतिवाक्यार्थः।विज्ञानादेवाप्नोति
स्वाराज्यामित्युक्त्वाच्छ्रौतस्मार्त्तानांकर्मणामानर्थक्यंप्राप्तमित्यतस्तन्मा
प्तयेतिकर्मणोऽङ्गार्थंप्रतिसाधनत्वप्रदर्शनार्थमिहोपन्यासः।ऋतमिति

व्यारव्यातं।स्वाध्यायोऽध्ययनंप्रवचनमध्यापनंब्रह्मयज्ञोवाएतान्यता
दीन्यनुष्ठेयानीतिवाक्यशेषः। सत्यंसत्यवचनंयथाव्याख्यातार्थंवा।
तपःकृच्छ्रादि।दमोबाह्येंद्रियोपरामः।शमोंतःकरणोपशमः।अग्नयश्चा
धातव्याः।अग्निहोत्रंचहोतव्यंअतिथयःपूज्याःमानुषमितिलौकिकसंव्य
वहारः।तच्चयथाप्राप्तमनुष्ठेयं।प्रजाचोत्पाद्या।प्रजननंकृतौनार्यागमनमि
त्यर्थः।प्रजापतिःप्रजोत्पत्तिःप्रजोनिवेशयितव्यइत्येतत्।सर्वैरेतैःक १२
र्मभिर्युक्तस्यापिस्वाध्यायप्रवचनेयत्नोनुष्ठेयइत्येवमर्थंसर्वेणसह
स्वाध्यायप्रवचनग्रहणं।स्वाध्यायाधीनंह्यर्थज्ञानंअर्थज्ञानायत्तंहिप
रंश्रेयःप्रवचनंचतदविस्मरणार्थंधर्मधर्मार्थंच।अतःस्वाध्यायप्रवचनयो

रादरःकार्यः।सत्यमितिसत्यमेवानुष्ठेयमिति।सत्यमेववोचेयस्पसोयं
सत्यवचानामवातस्पराथीतरःराथीतरस्यगोत्रोराथीतराचार्योमन्य
तेतपइतितपएवकर्त्तव्यमितितपोनित्यस्तपसिनित्यस्तपःपरःतपोनित्य
इतिवानाम।प्रकृष्टोऽस्यापत्यंपौरुशिष्टिराचार्योमन्यते।स्वाध्यायप्रव
चनेएवानुष्ठेयेइतिनाकोनामतःमुद्गलस्यापत्यंमौद्गल्यआचार्योम
न्यते।तद्धितपःकृत्यंस्मात्स्वाध्यायप्रवचनेएवतपस्तस्मान्नेएवानुष्ठेये
इतिउक्तानामपिसत्यतपःस्वाध्यायप्रवचनानांपुनर्ग्रहणमादरार्थं।अ
हंवृक्षस्येतिस्वाध्यायार्थोमंत्राम्नायः।स्वाध्यायश्चविद्योत्पत्तेयेप्रकरणा
द्विधार्थहीदंप्रकरणंनचान्यार्थत्वमगम्यते।स्वाध्यायेनविशुद्धसत्वस्यवि

द्योत्पत्तिरवकल्प्यते। अहंवृक्षस्योच्छ्रेदात्मकस्यसंसारवृक्षस्यरेरिवा
त्रे रयित्तांतर्याम्यात्मनाकीर्त्तिःस्मातिःगिरेःपृष्ठमिवोच्छ्रिताममऊर्ध्व
पवित्रःऊर्ध्वकारणंपवित्रंपावनंज्ञानप्रकाश्यंपवित्रंपरंब्रह्मयस्यस
र्वात्मनोममसोरुद्ध्वंपवित्रः।वाजिनीवबाजवतिवाजमन्नंतद्वतिसवि
तरीत्यर्थः।यथासवितर्यमृतमात्मतत्त्वंविष्ठंप्रसिद्धंश्रुतिस्मृतिशते ९३
भ्यःएवंस्वअमृतंशोभनंविष्ठंमात्मतत्त्वमस्मिन्नवामि।प्रविणंधनं
स्वर्च्चसंदीप्तिमत्तदेवात्मतत्त्वमस्मीत्यवर्त्तते।ब्रह्मज्ञानंवाआत्मतत्त्व
प्रकाशकत्वात्स्वर्च्चसंप्रविणंमोक्षस्वरूपहेतुत्वात्अस्मिन्मेप्राप्तं
मयेत्यध्याहारःकार्यः।सुमेधाःशोभनामेधार्वेसेशलक्षणावायस्यम

मसोहंसुमेधाः।संसारस्थित्युत्पत्त्युपसंहारकौशलयोगात्सु
मेधस्त्वं।अतएवामृतोऽमरणधर्माक्षितोऽक्षीणोऽव्ययः।अमृतेनवो
क्षितःसंसिक्तोऽमृतोहमितिब्राह्मणं।एवंत्रिशंकोरृषेर्ब्रह्मभूतस्य
ब्रह्मविदोवेदोवेदनमात्मैकत्वविज्ञानंतस्यप्राप्तिमन्त्रवचनंवेदा
न्तवचनंआत्मनःकृतकृत्यतारज्ञापनार्थंवामदेववत्।त्रिशंकुना
आर्षेणदर्शनेनदृष्टोमंत्रोनायआत्मविद्याप्रकाशकइत्यर्थः।।अस्य
जपोविद्योत्पत्त्यर्थोवगम्यते।ऋतंचसत्यंचेत्यादिकर्मोपन्यासादनंतरंच
वेदान्तवचनपाठादेतदवगम्यते।एवंश्रौतस्मार्त्तेषुनित्येषुकर्मसु
युक्तस्यनिष्कामस्यपरब्रह्मविविदिषोरार्षाणिदर्शनानिप्राप्तुर्भवंत्या

त्मादि विषयाणीतिगम्यते।वेदमनूच्येत्येवमादि कर्त्तव्यतोपदेशारंभः
प्राग्ब्रह्मविज्ञानान्नियमेनकर्त्तव्यानिश्रौतस्मार्त्तानिकर्माणीत्येवमर्थः।
अनुशासनश्रुतेःपुरुषसंस्कारार्थत्वात्संस्कृतस्यहिविशुद्धसत्वस्यात्मज्ञा
नमंजसेवोत्पद्यते।तपसाकल्मषंहंतिविद्ययाऽमृतमश्नुत इतिस्मृतिः।वस्तु
तस्तुतपसाब्रह्मविजिज्ञासस्वेत्यतोविद्योत्पत्त्यर्थमनुष्ठेयानिकर्माण्यनुशा
स्तीत्यनुशासनशब्दादनुशासनातिक्रमेहिदोषोत्पत्तिः।प्राग्उपन्यासाच्चक
र्माणांकेवलब्रह्मविद्यारंभश्चपूर्वंकर्माण्युपन्यस्तान्युदितायांचविद्यायां
अनयंप्रतिष्ठांविंदते।नबिभेतिकुतश्चनकिमहंसाधुनाकरवमित्येवमादि
नाकर्मनैःकिंचन्यंदर्शयिष्यतीत्यतोवगम्यतेपूर्वोपचितदुरितक्षयद्वारेण



विद्योत्पत्त्यर्थानिकर्माणीति।मंत्रवर्णाच्चाविद्ययामृत्युंतीर्त्वाविद्ययाऽमृतमश्नु
त इति।इत्तादीनांसर्वत्रोपदेशाज्ञानर्थक्यपरिहारार्थइहतुज्ञानोत्पत्त्स
र्थत्वात्कर्त्तव्तानियमार्थःवेदमनूच्याध्याप्याचार्योंतेवासिनंशिष्यमनु
शास्तिग्रंथंयत्रहणादनुपश्चात्शास्तितदर्थंग्राहयतीत्यर्थः।अतोवगम्यते
ऽधीतवेदस्यधर्मजिज्ञासामकृत्वागुरुकुलान्नसमावर्त्तितव्यमिति।बुध्या
कर्माणिचारभेदितिस्मृतेश्चाकथमनुशास्तीत्याह।सत्यंवदयथाप्रमाणा
वगतंवक्तव्यंवदनधर्मंचरधर्मइत्यनुष्ठेयानांसामान्यवचनात्सत्यादि
विशेषनिर्देशात्।स्वाध्यायादध्ययनान्माप्रमदःप्रमादंमाकार्षीराचार्या
याचार्यार्थंप्रियमिष्टंधनमाहृत्यानीयदत्वाविद्यानिष्क्रयार्थंआचार्येण

चानुज्ञातोऽनुरूपान्दारानाहृत्य प्रजातंतुं प्रजासंतानमाच्छेत्सीः
प्रजासंततेर्विच्छित्तिर्न्न कर्त्तव्या। अनुत्पद्यमानेपि पुत्रे पुत्रकाम्यादिकर्म
णातदुत्पत्तौ यत्नः कार्यश्चायमभिप्रायः। प्रजा प्रजननं प्रजातिश्रयनिर्देशसा
मर्थ्यादन्यथा प्रजननंचेत्येतदेकमेवावक्ष्यत्सत्यान्न प्रमदितव्यं
प्रमादो नकर्त्तव्यः सत्याच्च प्रमदनमनृतप्रसंगः प्रमादशब्दसामर्थ्याद्विस्मृ
त्याथनृतं नवक्तव्यमित्यर्थः। अन्यथाऽसत्यवदनप्रतिषेध एवस्यात्। धर्मा १५
न्न प्रमदितव्यं धर्मशब्दस्यानुष्ठेयविषयत्वादनुनेष्यानं प्रमादः सनकर्त्तव्यो
नुष्ठातव्यः। एवंऋषिवचनादात्मरक्षार्थात्कर्मणो न प्रमदितव्यं। नृतिर्विनृतिस्त
स्यैनृत्यर्थान्मंगलयुक्तात्कर्मणो न प्रमदितव्यं। स्वाध्यायप्रवचनाभ्यां न प्रमदि
तव्यं। तेहिनियमेनकर्त्तव्ये। देवपितृकार्याभ्यां न प्रमदितव्यं। देवपित्र्येकर्मणीक

र्त्तव्ये। मातादेवोयस्यसत्वं मातृदेवोभवस्याः एवंपितृदेवआचार्यदे
वेतिथिदेवोभवदेवतावदुपास्याएवेत्यर्थः। यान्यपिचान्यानि अनव
द्यान्यनिंदितानिशिष्टाचारलक्षणानिकर्माणितानिसेवितव्यानिकर्त्त
व्यानित्वया। नोइतराणिअकर्त्तव्यानिसावद्यानिशिष्टैःकृतान्यपि। या
न्यस्माकमाचार्याणांसुचरितानिशोभनान्याचरितान्याम्नायाश्चविरु
द्धानितानित्वयोपास्यान्यइष्टार्थान्यनुष्ठेयानिनियमेनकर्त्तव्यानिनो इत
राणिविपरीतानिआचार्यैःकृतान्यपि। ये केचविशेषिताआचार्यत्वादिध
र्मैरस्मदस्मत्तःश्रेयांसःप्रशस्यतरास्तेचब्राह्मणानक्षत्रियादयस्तेषा
मासनेनासनदानादिनात्वयाश्वसितव्यंश्वसनंश्वासःश्रमापन

यस्तेषांश्रमस्त्वयापनेतव्यइत्यर्थः।तेषांवासनेगोष्ठीनिमित्तेसभुदि
तेतेषुनप्रश्वसितव्यंत्रश्वासोपिनकर्त्तव्यः केवलंतद्दुष्कृसारथाहिणा
नवित्तव्यं।किंचयत्किंचिद्देयंतच्छ्रद्धयैवदातव्यंअश्रद्धयाऽदेयंनदा
तव्यंह्रियाविन्नत्यादेयंदातव्यंह्रियाभयाच्चदेयंभियाचनयेनसंवि
दाचसंविन्मित्रादिकार्य्यं।अथैवंवर्त्तमानस्ययदिकदाचित्तेतवश्रौ
तेस्मार्त्तेवाकर्मणिदुष्टेवाऽऽचारलक्षणेविचिकित्सासंशयःस्यन्नदेव
नूयेतत्रतस्मिन्देशेकालेवाब्राह्मणास्तत्रकर्म्मौहयुक्ताइतिस्यव
हितेनान्वयःकार्यःसंमर्शिनोविचारक्षमाःयुक्ताअनियुक्ताकर्मणिदुष्ट
तेवा॥अयुक्ताअपरत्रयुक्ताअलूक्षाअरूक्षाअक्रूरमनसोधर्मकामाः



ऋष्टयोऽकामहताइत्यर्थः।तेयथातत्रतस्मिन्कर्मणिदुष्टेवावर्त्तेरन्तथात्वमपि
वर्त्तेथाः।अथाभ्याख्यातेषुअभ्याख्यातादोषेणसंदिह्यमानेनसंयोजिताःकेनचित्॥ते
तेषुचयथोक्तंसर्वमुपनयोद्यतत्रेत्यादि।एषआदेशोविधिरेषउपदेशःएषात्रादिभ्यः
पित्रादीनांएषावेदोपनिषदेदंरहस्यंवेदार्थइत्येतदेवचानुशासनमीश्वरवचनं
।आदेशावाक्यस्यविधेरुक्तत्वात्सर्वेषांप्रमाणभूतानामनुशासनमेतत्।यस्मादेवं
तस्मादेवयथोक्तंसर्वमुपासितव्यंकर्त्तव्यमेवमुचैतदुपास्यंउपास्यमेवचैतन्नानुपास्य
मित्यादरार्थंपुनर्वचनं।शंनोमित्रइत्याद्याअतीतविद्याप्रास्युपसर्गप्रशमनार्थाशांतिः
पठिताइहानीतुवक्ष्यमाणाब्रह्मविद्याप्रास्युपसर्गोपशमार्थाशांतिःपठ्यतेशंनोमित्रःसह
नाववतिच।सहनाववतुनौशिष्याचार्यौसहैवावतुरक्षतुसहनौभुनक्तुभोजय

तु सहवीर्यं विद्यानिमित्तंसामर्थ्यंकरवावहैनिर्वर्त्तयावहैतेजस्विनौतेजस्विनोरधीतं
स्वधीतमस्त्वर्थज्ञानसंयोग्यस्त्वित्यर्थः।माविद्विषावहैविद्याग्रहणनिमित्तःशिष्य
स्याचार्यस्यवाग्रमारब्धव्यान्यायादिदेषःग्रासस्तच्छमायेयमाशीर्भाविद्विषाव
हैति।मैवेतरेतरंविद्वेषमापद्यावहै।शांतिःत्रिरुक्तिरुक्तार्था॥वक्ष्यमाणविद्यावि
घ्नप्रशमार्थंयंशांतिरविघ्नेनब्रह्मात्मविद्याप्राप्तिराशास्यतेतन्मूलंहिपरंश्रेयइति।सं
हिता।अधिविषयाणिकर्माणिविरुद्धानिउपासनान्युक्तानिअनंतरंचांतःसोपाधि
कात्मदर्शनमुक्तंव्याहतिद्वारेणस्वाराज्यफलंनचैतावताऽशेषतःसंसारबीज
स्योपमर्दनमस्तीत्यतोऽशेषोपप्लवबीजस्याज्ञानस्यनिवृत्त्यर्थंविधूतसर्वोपाधि
विशेषात्मदर्शनार्थमिदमारभ्यते।ब्रह्मविदाप्नोतिपरमित्यादि।प्रयोजनंचास्या

ब्रह्मविद्याया अविद्यानिवृत्तिस्ततश्चात्यंतिकःसंसारनाशोवक्ष्यतिचविद्वान्नबिने
ति कुतश्चनेतिब्रह्मवित्ब्रह्मवक्ष्यमाणलक्षणंहृदयंमत्वा ब्रह्मतवेत्तिविजाना
तीतिब्रह्मविदाप्नोतिप्राप्नोतिपरंनिरतिशयंतदेवब्रह्मपरं।इदंवाक्यंसर्वस्यप्रक
रणार्थस्यसूत्रभूतं।ब्रह्मविद्याफलंचब्रह्मविद्येयत्यरप्राप्तिलक्षणमुक्तंससर्वोप
नावःसर्वसंसारधर्मातीतत्वमेवनान्यदित्येतत्प्रदर्शनायेदमुच्यतेतत्तस्मि
न्नेवब्रह्मणवाक्योक्तेर्थेएषश्लोकोमुक्ताआम्नातासत्यंज्ञानमनंतंब्रह्मेतिब्रह्मणोलक्ष
णार्थंवाक्यं सत्यादीनित्रीणिविशेषणार्थानिपदानिविशेष्यस्यब्रह्मणः।विशेष्यं
ब्रह्मविवक्षितत्वात्प्रधानत्वाद्ज्ञेयतयाविशेषणविशेष्यत्वादेवसत्यादीन्येकवचनांतानिपदा
निसमानाधिकरणानिएतानिसत्यादिनिश्चित्रिभिर्विशेषणैर्विशेष्यमाणंब्रह्मविशेष्यं

तरेभ्योनिर्धार्यतेवंहितज्ज्ञानंभवतियदन्येभ्योनिर्धारितंसत्यादिशब्दात्परस्परं
संबध्यंतेपरार्थत्वात्तद्विशेष्यार्थाहितेइति।एकैकोहिविशेषणशब्दःपरस्परनिर
पेक्षोब्रह्मशब्देनसंबध्यतेसत्यंब्रह्मज्ञानंब्रह्मअनंतंब्रह्मेति।सत्यमितियद्रूपे
णयन्निश्चितंतद्रूपंनव्यभिचरतितत्सत्यं।यद्रूपेणानिश्चितंयत्तद्रूपंव्यभिचर
दनृतमित्युच्यते।अतोविकारजातमनृतं।वाचारंभणंविकारोनामधेयंमृत्तिके
त्येवसत्यं।सदेवसत्यमित्यवधारणात्।अतःसत्यंब्रह्मेतिब्रह्मविकारान्निवर्तय
ति।अतःकारणत्वंज्ञातंब्रह्मणःकारणस्यचकारकत्वंवस्तुत्वान्मृदादिरूप
ताचज्ञाताऽतइदमुच्यतज्ञानंब्रह्मेतिज्ञानंज्ञप्तिरवबोधः।भावसाधनोज्ञानशब्दोब्र
ह्मविशेषणत्वात्सत्यानंतान्वांसहप्रयोगात्।कर्तृत्वादिकारकनिवृत्त्यर्थंमृदादि



वदचिद्रूपतानिवृत्त्यर्थंचप्रयुज्यतेज्ञानंब्रह्मेतिवचनात्ज्ञानमंतवत्त्वं
लौकिकस्यज्ञानस्यांतवत्त्वदर्शनादतस्तन्निवृत्त्यर्थमाहानंतमिति।स
त्यादीनामनृतादिधर्मनिवृत्तिपरत्वाद्विशेष्यस्यचब्रह्मणःस्वार्थेनार्थवत्त
मेवातत्रानंतशब्दोऽतवत्त्वप्रतिषेधद्वारेणविशेषणंसत्यज्ञानशब्दोलक्ष्वा
र्थसमर्पणेनैवविशेषणेभवतः।ब्रह्मनसत्यादिशब्दवाच्यंकिंतुलक्ष्यंय
थाज्ञातंब्रह्मयोवेदविजानातिनिहितंस्थितंगुहायांगुहतेःसंवरणा
र्थस्यनिगूढाअस्यांज्ञानज्ञेयज्ञातृपदार्थाइतिगुहाबुद्धिः।गूढावस्यांभोगा
पवर्गोर्थरूपार्थावितिवातस्यांपरमेव्रह्मण्योमन्व्योम्नाकाशेज्ञाता
त्मतयेतद्धिपरमंव्योम।एतस्मिन्क्षुरवत्त्वक्षुरेगार्ग्यौकाशइत्यक्षरसन्नि
कर्षोक्तःतस्मिन्गूढार्हेव्योम्नियागुहाबुद्धिस्तस्यांनिहितंब्रह्मानंतइत्याविवि

रूपोपलभ्यतेनान्यथाविशिष्टदेशकालसंबंधोस्तिब्रह्मणःसर्वगतत्वानि
र्विशेषत्वाच्च॥सएवंब्रह्मविज्ञानन्किमित्याप्नोत्युंकेसर्वान्निरवशिष्टान्का
मान्भोगान्॥किमस्मदादिवत्क्रमेणस्वर्गादीन्यर्थायेणनेत्याह सहयुगपदेकक्षणे
पारूढानेवैकयोपलब्ध्यासवित्प्रकाशवन्नित्ययाब्रह्मस्वरूप्यव्यतिरिक्तया
।यामचोच्चामसत्यंज्ञानमितिएतल्लक्ष्यतेब्रह्मणासहेतिब्रह्मक्रतोविद्वान्ब्र
ह्मस्वरूपेणैवसर्वान्कामान्सहाश्नुते।नयथोपाधिकृतेनस्वरूपेणजलसूर्यका
दिवत्प्रतिबिंबभूतेनसांसारिकेणधर्मादिनिमित्तापेक्षांश्चक्षुरादिकरणापेक्षांश्च १९
कामान्पर्यायेणाश्नुतेलोकः।कथंतर्हियथोक्तेनप्रकारेणसर्वज्ञेनसर्वगतेनस
र्वात्मनानित्यब्रह्मात्मस्वरूपेणधर्मादिनिमित्तानपेक्षांश्चक्षुरादिकरणानिरपेक्षां
श्चसर्वान्कामान्सहैवाश्नुतइत्यर्थः।वियश्चितामेधाविनासर्वज्ञेन तद्विपश्चित्यं

यत्सर्वज्ञत्वंचेतनसर्वज्ञस्वरूपेणब्रह्मणाश्नुतइति।इतिमन्त्रसमाप्त्यर्थ
॥॥सर्वेएववाक्यार्थाब्रह्मविद्याप्नोतिपरमितिब्राह्मणवाक्येनसूत्रितःसचसूत्रि
तोर्थःसंक्षेपेतामंत्रेणव्याख्यातःइनस्तस्यैविवेस्तरेणार्थनिर्णयःकर्त्तव्यइत्यु
त्तरस्तइतिस्थानीयोयंग्रंथआरभ्यतेतस्माद्वाएतस्मादितिमूलवाक्यसूत्रितंब्र
ह्मपरामृश्यतेएतस्मादितिमंत्रवाक्येनानंतरंलक्षितंतस्मादेतस्माब्रह्मणआ
त्मनआत्मशब्दाच्चात्माहितस्यसर्वस्यतत्सत्यंसत्यात्मेतिश्रुत्यंतरात्च
तोब्रह्मात्मातस्मादेतस्माब्रह्मणआत्मस्वरूपादाकाशःसंभूतःसमुत्पन्नः
आकाशोनामश्रोत्रैकगुणोऽवकाशकरोमूर्त्तद्रव्याणांतस्माच्चाकाशात्स्पर्शन
स्पर्शगुणोनष्टवर्णाकारणगुणोनशब्देनविगुणोवायुःसंभूतइत्यनुवर्त्तते

वायोश्चस्वेनरूपगुणेनपूर्वान्त्यांचत्रिगुणोग्निःसंभूतःअग्नेःस्वेनरसगुणेनपूर्वैश्च
त्रिभिश्चतुर्गुणाःआपःसंभूताःअद्भ्यःस्वेनगंधगुणेनपूर्वैश्चतुर्भिःपंचगुणापृथि
वीसंभूताइथिमाओषधयओषधीभ्योनंअन्नाद्रेतोरूपेणापरिणतान्पुरुषःशि
रःपाणयाद्याकृतिमानूसवाएषपुरुषोनरसमयोनरसविकारःपुरुषाकृतिनावि
तंहिसर्वेभ्योंगेभ्यस्तेजःसंभूतंरेतोबीजंतस्माद्योजायतेसोपितथापुरुषाकृतिरेव २०
स्यात्सर्वजातिषुजायमानानांजनकाकृतिनियमदर्शनात्सर्वेषामप्यन्नरसविका
रत्वेअन्नचंद्रयवेचाविशिष्टेकस्मात्पुरुषएवगृह्यतेप्राधान्यात्किंपुनःप्राधान्यंक
र्मज्ञानाधिकारःपुरुषएवहिशक्तत्वादर्थित्वाच्चकर्मज्ञानयोरधिक्रियतेपुरुषत्वावि
स्तरामात्मेत्यादिश्रुतेः।सहिपुरुषइहविद्यायांतरतमंअन्नसंक्रामयितुमिष्टस्तस्मच

वात्माकारविशेषनात्मस्वात्मनाविताबुद्धिःकात्स्न्यहसांतरतमप्रत्यगात्मविषया
लंबनाच्चकर्तुमशक्येतिदृष्टशरीरात्मकल्पनयाशरीरवाचंद्रनिदर्शनवदंतःप्रवेशयन्ना
हतस्येदमेवशिरःप्रसिद्धंप्राणमयादिद्यशिरसांशिरस्त्वदर्शनादिहापितस्यसंगोमात्र
मितीदमेवशिरइत्युच्यतेएवंपक्षादिषुयोजना।अयंदक्षिणोबाहुःपूर्वान्मुखस्यदक्षि
णःपक्षःअयंसव्योबाहुरुत्तरःपक्षःअयंमध्यमोदेहभागआत्मांगानांमध्यंत्वेषामंगा
नामात्मेतिश्रुतेः।इदमितिनाभेरधस्ताद्यदंगंतत्पुच्छंप्रतिष्ठाकल्पनयेतिशास्त्रेपुच्छमिवपुच्छ
मध्यालंबनसाम्याद्यथागोपुच्छंएतत्प्रकृत्यान्तरेषांप्राणमयादीनांरूपकल्पसिद्धिःमु
खादिनिर्विशेषश्रुततात्रापिप्रतिमावत्।तदप्येषश्लोकोभवतितत्रास्मिन्नेवार्थेअन्न
मयात्मप्रकाशाकएवश्लोकोमंत्रोभवतिअन्नाद्वैप्रजाःप्रजायंतइत्यन्नात्सादिभावपरि

णतावै इतिस्मरणार्थोऽन्नजाःस्थावरजंगमाःप्रजायंतेयाःकाश्चाविशिष्टःपृथिवीश्रिताःपृथिवीमाश्रिताःसर्वाअन्नादेवप्रजायंतेऽथोऽपिजाताअन्नेनैवजीवंतिप्राणान्धारयंतिवर्धंत इत्यर्थः।अथाप्येनदन्नमपियंतिअपिगछंतिअपिशब्दःप्रशब्दार्थेःअन्नेप्रलीयंतइत्यर्थः अंततोंतेजीवनलक्षणायाहुतेःपरिसमाप्तौ।कस्मादन्नंहियस्मान्भूतानांप्राणिनांज्येष्ठंप्रथमजमन्नमयानांहीतरेषांभूतानाकारणमन्नंअतोन्नप्रलयाअन्नजीवनाअन्नप्रलयाश्चसर्वाःप्रजायस्माच्चैवंतस्मात्सर्वौषधंसर्वप्राणिनांदाहप्रशमहेतुमन्नमुच्यते।अन्नप्रलयविदःफलमुच्यते।सर्वंवैतेसमस्तमन्नजातंआप्नुवंति।केयेऽन्नं*ब्रह्मयथोक्तमुपासते।कथमन्नजोऽन्नात्माऽन्नप्रलयोहंतस्मादन्नंब्रह्मेति।कुतःपुनःसर्वान्नप्राप्तिफलमन्नात्मोपासनमित्युच्यते।अन्नंहिभूतानांज्येष्ठंभूतेभ्यःपूर्वनिष्पन्नत्वाज्ज्येष्ठंहियस्मा



तस्मात्सर्वौषधमुच्यतेतस्माद्उपपन्नासर्वान्नात्मोपासकस्यसर्वान्नप्राप्तिः।अन्नान्भूतानिजायंतेजातान्यन्नेनवर्धंतइत्युपसंहारार्थेनवर्वचनं।इदानींमन्नंनिर्वचनमुच्यते।अद्यतेचैवयद्भूतैरत्तिचभूतानिस्वयंतस्मादन्नंतदुच्यते।इतिशब्दःप्रथमकोशसमाप्त्यर्थः॥अन्नमयादिभ्यआनंदमयांतेभ्यआत्मभ्योभ्यंतरतमंब्रह्मविद्यात्यगात्मत्वेनदिदर्शयिषुशास्त्रमविद्याकृतपंचकोशापनयेनअनेकतुषकोद्रवविलुषीकरणेनेवतंडुलान्त्सरतेतितस्माद्वाइत्यादि।तस्मादेतस्माद्यथोक्तादन्नरसमयात्पिंडादन्योंतरोभ्यंतरआत्मापिंडवदेवमित्यापरिकल्पितआत्मत्वेनप्राणमयःप्राणोवायुस्तन्मयस्तत्प्रायत्वेनप्राणमयेनान्नरसमयआत्मेषपूर्णःवायुनेवदृतिः॥सवाएषप्राणमयआत्मान्नरु

षविधएवपुरुषाकारएवशिरःपक्षादिभिः।किंस्वतएवनेत्याहात्रसिद्धंतावन्न
रसमयस्यात्मनःपुरुषविधत्वंतस्यान्नरसमयस्यपुरुषविधतामन्वयंप्राणमयःपुरु
षविधःपूर्वा निषिक्तप्रतिमावन्नस्वतएवाएवंपुरुषविधतामन्तरोन्तरःपुरुष
विधोन्नवतिपूर्वःपूर्वश्चोत्तरोत्तरेणपूर्णःकथंपुनःपुरुषविधताऽस्येतिउच्यतेतस्य
प्राणमयस्यप्राणएवशिरःप्राणमयस्यवायुविकारस्यप्राणोदक्षिणोनासिकानिः स २२
रणोपानोत्तिविशेषःशिरइवपरिकल्पितोवचनात्सर्वत्रवचनादेवपक्षादिकल्पनाव्या
नोव्यानवृत्तिर्दक्षिणःपक्षःअपानउत्तरपक्षःआकाशआत्मायआकाशस्योपनिवि
शेषःसमानोमध्यस्थआत्मेवात्माप्राणवृत्त्यविकारान्मध्यस्थत्वादितराःपर्यंतावृत्ती
रपेक्षआत्मामध्यं मेषामंगानामात्मेतिप्रसिद्धंमध्यस्थस्यात्मत्वंपृथिवीपुच्छंप्रति

षष्ठपृथिवीतिपृथिवीदेवताआध्यात्मिकप्राणस्यधारयित्रीस्थितिहेतुत्वात्
।सैषापुरुषस्यापानमवष्टभ्येतिश्रुत्यंतरंअन्यथोदानवृत्त्यार्ध्वगमनंगुरु
त्वाच्चपतनंवास्याच्छरीरस्य।तस्मात्पृथिवीदेवतापुच्छंप्रतिष्ठाप्राणमयस्या
त्मनः।तत्तस्मिन्नेवार्थेप्राणमयस्यात्मविषयेएषश्लोकोभवति।प्राणंदेवाअनुप्रा
णंतिदेवाःप्रजापतयःप्राणंवाश्चात्मानंप्राणनशक्तिमंतंअनुतदात्मभूताःसं
तःप्राणंतिप्राणनकर्मकुर्वंतिप्राणनक्रिययाक्रियावंतोभवंतिअध्यात्मा
धिकारादेवाइंद्रियाणिघ्राणमनुप्राणंतिमुख्यंप्राणमनुचेष्टंतइतिवानिया
मनुष्याःपशवश्चयेनेप्राणनकर्मणैवचेष्टावंतोभवंतिश्वसंश्चनात्ममयेनैव
परिछिन्नेनात्मनात्मवंतःप्राणिनःकिंतर्हिनदंतर्गतप्राणमयेनापिसाधारणे

नैव सर्वपिंड व्यापिनाऽऽत्मवंतो मनुष्यादयः। एवं मनोमयादिनिःशेषसर्वव्यापिनि रुत्तरोत्तरैः स्तुत्यैरानंदमयांतैराकाशादिभूतावृतैरविद्याकृतैरात्मवंतः सर्वप्राणिनः। तथास्वाभाविकेनाप्याशोकादिकारणेननित्येनविक्तेनसर्वगतेनसत्यज्ञानानंत लक्षणेनपंचकोशातिगेनसर्वात्मनाऽऽत्मवंतः सहिपरमार्थतऽआत्मासर्वेषामित्ये तदप्यर्थाद्युक्तंभवतिप्राणंदेवाऽनुप्राणंतीत्याद्युक्तंतत्कस्मादित्याहयस्माद्भूतानां २३
प्राणिनामायुर्जीवनंयावध्यस्मिन्शरीरेप्राणोवसतितावदायुरितिश्रुत्यंतरात्तस्मा त्सर्वायुषंसर्वेषामायुःसर्वायुःसर्वायुरेवसर्वायुषमुच्यतेप्राणापगमेमरणप्रसिद्धेः प्रसिद्धंहिलोकेसर्वायुषंप्राणस्यातोस्माद्धेतोरादसाधारणादनमयादात्मनोऽपक्रम्या तःसाधारणंप्राणंप्राणमयमात्मानंब्रह्मोपासतेयेऽहमस्मिप्राणःसर्वभूतानामात्मा

आयुर्जीवनहेतुत्वादितितेसर्वमेवायुरस्मिल्लोकेयंतिनापमृत्युनाम्रियंतेप्राक्प्रा साद्यायुषइत्यर्थः। शतंवर्षाणीतियुक्तंसर्वमायुरितिश्रुतिप्रसिद्धेःकिंकारणंप्राणो हिभूतानामायुस्तस्मात्सर्वायुषमुच्यतइतियोयुक्तंब्रह्मोपास्तेसतत्फलंप्राप्नो तीतिविद्याफलप्राप्तेर्हेत्वर्थेपुनर्वचनंप्राणोहीत्यादि। तस्यसर्वस्यान्नमयस्यएषएव शारीरेऽन्नमयेनवःशरीरआत्माकःयएषप्राणमयःतस्माद्वाइत्युक्तार्थमन्यदाऽन्यो तरऽआत्मामनोमयःमनइतिसंकल्पाद्यात्मकमंतःकरणंतन्मयोमनोमयोयथान्नमय स्यप्राणमयस्तथासोयंप्राणमयस्याभ्यंतरऽआत्मातस्ययजुरेवशिरःयजुरित्यनिय ताक्षरपादावसानोमंत्रविशेषस्तज्जातिवचनोयजुःशब्दःतस्यशिरस्त्वंप्राधान्यात्प्राधा न्यंचयेयंजुःयागादौसंनियत्योपकाराद्यज्ञुषाहिहविर्दीयतेस्वाहाकारादिना। वाच

निकीवाशिर आदिकल्पनासर्वत्रमनसोहिस्थानत्रयत्वनादस्वरवर्णपदवाक्यविषयात
संकल्पात्मिकातस्यावितावृत्तिःश्रोत्रादिकरणद्वारायज्ञःसंकेतविशिष्टयज्ञुरित्युच्च
तेएवमृगेवंसामएवंमनोहवृत्तित्वेमंत्राणांवृत्तिरेवावर्त्यतइतिमानसोजपउपपद्यतेआ
देशोचब्राह्मणमादेष्व्यविशेषानादिशतीति।अथर्वणाअंगिरसाचदृष्टामंत्राब्राह्मणं
चत्रयांतिकपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात्पुछंप्रतिष्ठातदप्येषश्लोकोभवति
मनोमयात्मप्रकाशकःसूर्ववत्प्रायतोवाचोनिवर्तंतइत्यादि।अन्योंतरआत्माविज्ञानमयो २४
मनोमयस्याभ्यंतरोविज्ञानमयःमनोमयोवेदात्मोक्तोवेदार्थविषयाबुद्धिर्निश्चयात्मि
काविज्ञानंतच्चाध्यवसायलक्षणमंतःकरणस्यधर्मस्तन्मयोनिश्चयविज्ञानेःप्रमाणत्वरू
पैर्निर्वर्त्तितआत्माविज्ञानमयःप्रमाणविज्ञानपूर्वकोहियज्ञादिस्तायते।यज्ञादिहेतुत्वंचव

स्यतिश्लोकोननिश्चयविज्ञानवतोहिकर्तव्येष्वर्थेषुसर्वंश्लोक्यतेसासर्वकर्तव्यता
नांश्रायम्याच्छिरइवशिरःऋतसत्येयथाआख्यातेयोगोयुक्तिःसमाधानमात्मेवा
त्माआत्मवतोहियुक्तस्यसमाधानवतोंगानीवश्रादीनियथार्थत्वमाप्नुवंति
तितस्माच्छ्रद्धायोगआत्माविज्ञानमयस्यमहःपुछंप्रतिष्ठामहइतिमहत
त्वंत्रयमजांमहश्चक्रेब्रह्मेतिश्रुत्यंतरात्पुछंप्रतिष्ठाकारणत्वात्।कारणंहि
कार्याणांप्रतिष्ठायथाद्यावीरुधांपृथिवीसर्वबुद्धिविज्ञानानांमहत्तत्त्वंकार
णंतेनतत्विज्ञानमयस्यात्मनःप्रतिष्ठातदप्येषश्लोकोभवतिसर्ववत्यथान्न
मयादीनांआत्मनोक्तानांप्रकाशकाःश्लोकाएवंविज्ञानमयस्यापिविज्ञानंयज्ञं
तनुतेविज्ञानवानूहियंतंतनोतिश्रद्धादिसर्वकं।अतोविज्ञानस्यकर्तृत्वं।कर्मा

णीत्यतनुतेयस्माद्विज्ञानकर्तेकंसर्वंतस्माद्युक्तंविज्ञानमयआत्माब्रह्मेतिवि
ज्ञानंब्रह्मसर्वेदेवाइंद्रादयोज्येष्ठंप्रमजत्वात्सर्वंब्रह्मेतिनांवातत्पूर्वकत्वात्प्र
थमजंविज्ञानंब्रह्मोपासतेध्यायंतितस्मिन्विज्ञानमयेब्रह्मण्यात्मानंकृत्वोपास
तइत्यर्थःतस्मात्तेमहब्रह्मणउपासनात्तज्ञानैश्वर्यवंतोभवंतितच्चविज्ञानंब्रह्म
चेत्यदिवेदविजानातिनकेवलंवेदैवतस्माब्रह्मणश्चैनंप्रमाद्यतिब्राह्मणेवाना २५
त्मस्वात्मभावितत्वात्तांविज्ञानमयेब्रह्मण्यात्मभावनायाःप्रमदनंतन्निहत्यर्थ
मुच्यतेतस्माच्चैनंप्रमाद्यतीतिश्रुत्यादिषात्मभावंहित्वाकेवलेविज्ञानमये
ब्रह्मण्यात्मत्वंभावयन्नास्तेचेदित्यर्थःततःकिंस्यादित्युच्यतेशरीरेयाप्तमनोहित्वा
शरीरात्मिमाननिमित्ताहिसर्वेपाप्मानःतेषांचविज्ञानमयेब्रह्मण्यात्माभिमानात्नि

मित्तायेहानयुपपद्यतेछत्रापायइवछायापायस्तस्माच्छरीरात्मिमाननिमित्ता
न्सर्वान्पाप्मनःशरीरंप्रजहात्यशरीरएवहित्वाविज्ञानमयब्रह्मस्वरूपापन्नस्त
स्माच्छान्सर्वान्कामान्विज्ञानमयेनैवात्मनासमश्नुतेसम्यक्भुंक्तेतस्यमनोमयस्या
त्माएषएवशरीरेमनोमयेभवःशरीरःकःमयएषविज्ञानमयःतस्माद्वाइत्युक्ता
र्थौ।आनंदमयइतिकार्यात्मप्रतीतिरधिकारात्मयट्शब्दाच्च।कार्यपतितएवानं
दमयोनपरएवात्माआनंदइतिविद्याकर्मणोःफलंतद्विकारश्चानंदमयःसचविज्ञान
मयादंतरःप्रियादिप्रासनानिर्हेतोश्चात्मानंदमयोविज्ञानमयाश्रितःस्वप्नउपलभ्य
तेतस्यानंदमयस्यात्मनइष्टश्रुत्यादिदर्शनंप्रियंशिरइत्यवयवःप्राधान्यात्मोदइनि
प्रियलाभनिमित्तोहर्षःसएवप्रकृष्टोहर्षःप्रमोदःआनंदइतिस्वरूपसामान्यंआत्मा

स्वरवाचयवानां।तेष्वप्यनुस्यूतत्वात्।आनंदइतिपरंब्रह्मतद्विशेषकर्मणाप्रत्युपस्थाप्य
मानेइत्रमित्रादिविषयविशेषोपाधावंतःकरणवृत्तिविशेषेतमसाऽत्रछाद्यमानेस
सति नैंत्रिमज्यतेतद्विषयस्वरवमितिश्रुतिरुलोकेतवृत्तिविशेषप्रत्युपस्थापकस्यकर्म
णोऽनवस्थितत्वात्स्वरवस्यक्षणिकत्वं।तद्यदांतःकरणंतपसातमोघ्नेनविद्यया ब्रह्मच
र्येणश्रद्धयाचनिर्मलत्वमापद्यतेयावद्यावत्तावद्विविक्तेप्रसन्नेंतःकरणेआनंदवि २६
शेषउत्कृष्यतेविप्रलीनवति।यस्यचप्रतिपत्त्यर्थंपंचान्नादिमयाःकोशाउपन्यस्ता
यच्चतेभ्योंतरंयेनचतेसर्वेआत्मवंतस्तद्ब्रह्मइतिश्रुतिश्च।तदेवचसर्वस्यावि
द्यापरिकल्पितस्यद्वैतस्यावसानभूतमद्वैतंब्रह्मप्रतिष्ठा।तदेतस्मिन्नप्यर्थेएष
श्लोकोभवति।योनास्तिब्रह्मेतिमन्यतेससर्वस्यैवसन्मार्गस्यवर्णाश्रमादिमवस्था

लक्षणस्यनास्तित्वंप्रतिपद्यतेऽतोनास्तिकःसोऽसन्नसाधुरुच्यतेलोकेतद्विपरीतः
पुनर्योस्तिब्रह्मेतिचवेदसचतब्रह्मप्रतिपत्तिहेतुंसन्मार्गंवर्णाश्रमादिमवस्थालक्ष
णंश्रद्दधानतयायथावत्प्रतिपद्यतेयस्मात्ततस्तस्मात्सं।तंसाधुमार्गस्थमेनंविदुःसा
धवस्तस्मादस्तीत्येवब्रह्मप्रतिपत्तव्यमितिवाक्यार्थः।तस्यैवंसर्वस्यविज्ञानमयस्यैषए
वशारीरेविज्ञानमयेनवःशारीरआत्मा।कोसौयएषआनंदमयस्तंप्रतिनास्त्याशंका
नास्तित्वे॥अथोऽसर्वविशेषत्वान्नब्रह्मणोनास्तित्वंप्रत्याकांक्षांयुक्तासर्वसामान्या
च्चब्रह्मणःयस्मादेवंअतस्तस्मादथानंतरंश्रोतुःशिष्यस्यानुप्रश्नाआचार्यंकिमनुए
तेप्रश्नाअनुप्रश्नाः।सामान्यंहिब्रह्मआकाशादिकारणत्वाविदुषोऽविदुषश्चतस्मादवि
दुषोपिब्रह्मप्रतिराशंक्यते।उतअपिअविद्वानमुंलोकंपरमात्मानमितःप्रेत्यकश्च

नचनशब्दोप्यर्थेऽपिगछतिप्राप्नोतिकिंवानगछतीतिद्वितीयोपिप्रश्नोनुदृष्टमश्रु
नुमाइतिवक्तव्यंनात्।विद्वांसंप्रत्यन्योप्रश्नो।यद्यविद्वान्समान्यंकारणमपिब्रह्मनग
छतितत:विदुषोपिब्रह्मगमनमाशंक्यतेऽतस्तंप्रतिप्रश्न:अहोइति।विद्वान्ब्रह्मवि द
पिकश्चिदित:प्रेत्यामुंलोकंसमश्नुतेउतनवंस्थितेअयादेशेलोपेचछतेऽकारस्य
श्रुति:समश्नुताइतिविद्वान्समश्नुतेमुंलोकं।किंवक्तव्यंयथाऽविद्वान्एवंविद्वानपिनसम
श्नुतइत्यन्यःप्रश्नोएतेषांश्रुतिवचनार्थमुत्तरोग्रंथआरभ्यते।तत्रास्तित्वमेवतावद २७
ुच्यते।यच्चोक्तंसत्यंज्ञानमनंतंब्रह्मेतितच्चकथंसत्यमित्येतवक्तव्यमितिदमुच्य
ते।सत्वेनास्तित्वंनैवंसत्यत्वमुच्यतेऽक्तंहिसदेवसत्यमितितस्मात्सदेवब्रह्मेतियुक्तं
।तद्यदिमृद्बीजादिवत्कारणंस्यादचेतनंतर्हिनकामयितृत्वात्।नहिकामयितृचेत

तनभस्तिलोको।सर्वज्ञंहिब्रह्मेत्यवोचामातःकामयितृत्वोपपत्तिरित्येतदाहसइति।स
आत्मायस्मादाकाशःसंभूतःअकामयतकामितवान्।कथंबक्ष्यतःस्यान्नवेयं।क
थमेकस्यार्थांतराननुप्रवेशेबक्ष्यत्वंस्यादित्युच्यतेप्रजायेयउत्पद्येय।नहिप्रत्युत्पत्त्येवा
र्थांतरंहिरविषयंबक्ष्यनवनंकथंतर्हिआत्मस्थानभिव्यक्तनामरूपाभिव्यक्त्यायदाआत्म
स्थेनभिव्यक्तेनामरूपेव्याक्रियेतेतदानामरूपेआत्मस्वरूपपरित्यागेनैवब्रह्मणोत्रावे
क्षदेशकालेसर्वावस्थास्वव्याक्रियेतेतदानंनामरूपव्याकरणंब्रह्मणोबक्ष्यनवनं।
नान्यथानिरवयवस्यबक्ष्यत्वोपपत्तिरुपपद्यतेऽतोनामरूपेसर्वावस्थेब्रह्मणोवात्मवती
।नब्रह्मतदात्मकंतेतत्त्रत्याख्याने नस्तइतितदात्मकेउच्येते।तस्मांचोपाधिभ्यांज्ञातृज्ञे
यज्ञानज्ञेयार्थादिसर्वसंव्यवहारनाब्रह्मसआत्मापएवंकाम:संस्तपोतप्यततपश्चरितवा

नमुच्यतेयस्यज्ञानमयंतपइतिऋत्यंतरान्नआप्तकामत्वाच्चेतरस्यासंभवए
वंतपसः।तपोऽतप्यततप्तवान्सृज्यमानजगच्चनादिविषयामालोचनामकरो
दात्मेत्यर्थःसएवमालोच्यतपस्तप्त्वाप्राणिकर्मादिनिमित्तानुरूपमिदं सर्वंजगदे
शतःकालतोनामरूपेणचयथानुभवंसर्वप्राणिनिःसर्वावस्थैरनुरूप्यमानम
सृजंतंसृष्टवान्।यदिदंकिंचयत्किंचेदमविशिष्टं तदिदंजगत्सृष्ट्वाकिमकरोदित्यु
च्यते तदेवसृष्टंजगदनुप्राविशत्।तत्रैतच्चिंत्यंकथमनुप्राविशदिति।किंयःस्र २८
ष्टासतेनैवात्मनानुप्राविशदुतान्येनेतिकिंतावद्युक्तंश्रुत्याश्रवणाद्यःसृष्टासएवा
नुप्राविशदिति।तदेवेदमाकाशादिकारणंकार्यंसृष्ट्वातदनुप्रविष्टमितिवांतरगुहायां
बुद्धौदृष्टेरात्मंतरविज्ञात्रित्येवंविशेषचदुपलभ्यतेसएवतत्रप्रवेशःतस्मादस्ति

तत्कारणंब्रह्मातोऽस्तित्वादस्तीत्येवोपलब्धव्यंतत्।तत्कार्यमनुप्रविश्यकिंसच्चमूर्त्तं
त्यच्चामूर्त्तमनवत्।मूर्त्तामूर्त्तेसत्यआकृतनामरूपेआत्मस्थेअंतर्गतेनात्मनाव्यक्ति
येतेमूर्त्तामूर्त्तशब्दवाच्येतेआत्मनात्वविनाकृतदेशकालेइतिकृत्वाआत्मातेअनव
दित्युच्यते।किंचनिरुक्तंनामनिरुक्तस्यसमानासमानजातीयेभ्योदेशकालविशिष्ट
तयेदंतदित्युक्तंनिरुक्तंअनिरुक्तंतद्विपरीतंनिरुक्तानिरुक्तेअपिमूर्त्तामूर्त्तयोरेवविशे
षणे।यथासच्चत्यच्चत्रत्यक्षपरोक्षे।तथानिलयनंचानिलयनंनीडंआश्रयो
मूर्त्तस्यैवधर्मः।अनिलयनंतद्विपरीतममूर्त्तस्यैवधर्मःत्यदनिरुक्तानिलयनान्यमूर्त्त
र्त्तधर्मत्वेपिआकृतविद्यायाएवसर्गोत्तरकालभावश्रवणात्त्यदितिप्राणाद्यनिरु
क्तंतदेवानिलयनंचअतोविशेषणान्यमूर्त्तस्यआकृतविषयाएयेवेतानि।विज्ञानंचे

तनंअविज्ञानंतन्नहिनमचेतनंपाषाणादिसत्यंव्यवहारविषयमधिकारात्नपरमा
र्थसत्यंएकमेवहियरमार्थसत्यं ब्रह्म। इहत्वनर्थव्यवहारविषयमापेक्षिकं।मृगतृष्णि
काघनृतापेक्षयोदकादिसत्यमुच्यते।अनृतंतद्विपरीतं।किंत्वनरेतत्सर्वमनृतवत्यर
मार्थसत्यंकिंत्वनस्तइ ब्रह्मसत्यंसानमनंतंब्रह्मेतिश्रुतत्वात्। यस्मात्सत्यादादि
कंमूर्त्तामूर्त्तजातंयत्किंचेदंसर्वमविशिष्टं कार्यजातमेकमेवसच्छब्दवाच्यंब्र
ह्मानृतवत्व्यतिरेकेणाभावान्नामरूपविकारस्यतस्मात ब्रह्मसत्यमित्याचक्षतेब्र
ह्मविदःतदेतस्मिन्नर्थेब्राह्मणोक्तेएषश्लोकोमंत्रोभवति। यथाइर्वैषन्नमयाद्यात्मन्न
काशकाःपंचस्वेवंसर्वोत्मास्तित्वन्नकाशकोपिमंत्रःकार्यद्वारेणभवति असद्वाइद
मयआसीत्। असदितिव्याकृतनामरूपविशेषविपरीतमविकृतंब्रह्मोच्यतेनत्वन



रत्यंतमेवासत्नत्यसतःसज्जन्मास्ति।इदमितिनामरूपविशेषवद्व्याकृतंज
गदग्रेसर्वंब्रायुत्पत्तेर्ब्रह्मैवासच्छब्दवाच्यमासीत्ततोसतोब्रह्मणोवैसत्त्रवि
क्तनामरूपविशेषमजायतोत्पन्नं।किंतनःब्रविभक्तकार्यमितिपितुरिव
ब्रूतेनेत्याह।तदसच्छब्दवाच्यंस्वयमेवात्मानमेवाकुरुतकृतवत्यस्मादेवं
तस्मात्तब्रह्मस्वकृतंस्वयंकर्तृउच्यतेस्वयंकर्तृब्रह्मेतिश्रुतिर्लोकेसर्वकारण
त्वात्।यस्मात्वास्वयमकरोत्सर्वंसर्वात्मनातस्मात्सुष्ठुरूपेणापितदेवब्रह्मकार
णंस्वकृतमुच्यते।सर्वथापिपुत्रफलसंबंधादिकारणंस्वकृतशब्दवाच्यंश्रुतिर्लो
केयदिवाऽन्यत्साश्रुतिसिद्धिर्निर्त्येचेतनावत्कारणेसत्युपपद्यतेतस्माद
स्तितब्रह्मस्वकृतश्रुतिसिद्धेः।इतश्चास्तिकुतःरसत्वात्कुतोवैरसत्वश्रुतिसिद्धिर्ब्रह्म

णाइत्यतआहयद्वैतत्सुकृतंरसोवैसःरसोनामतृप्तिहेतुरानंदकरोमधुराद्यात्मा
:ब्रह्मसिद्धोलोकेरसमिवायंहिलब्ध्वाप्राप्यानंदीभवतिनासतआनंदहेतुत्वंलो
के।बाह्यानंदसाधनरहितात्पयनीकृतिरेषणाआत्मणाबाह्यरसलाभादिचेत्ता
नंदाहृश्यंतेविद्वांसोनूनंब्रह्मैवरसस्तेषांतस्मादस्तितत्तेषामानंदकारणंरस
वब्रह्म।इतश्चास्तिकुतःप्राणनादिक्रियादर्शनाद्यमप्यहिपिंडोजीवतःप्राणो
नप्राणितिअपानेनाँतीत्येवंचायवीयाऐंद्रियकाश्चचेष्टाःसंहतैःकार्यकरणैर्नि ३०
र्वर्त्यमानादृश्यंतेतच्चैकार्यहृत्तित्वेनसंहननंनांतरेणोचेतनमसंहतंसंभवति
अन्यत्रादर्शनात्तदाह।यद्यदिएषआकाशेपरमेव्योम्निगुहायांनिहितआ
नंदोनस्यान्नभवेत्कोह्येवलोकेऽन्यादपानचेष्टांकुर्यादित्यर्थः।कःप्राणात्प्रा



णनंवाकुर्यात्तस्मादस्तितद्ब्रह्मयदर्थाःकार्यकरणप्राणनादिचेष्टाःतत्कृतए
वचानंदोलोकस्यकुतःएषहिएवपरमआत्माआनंदयात्यानंदयतिस्वरूपय
तिलोकंधर्मानुरूपंसएवात्माआनंदरूपोऽविद्यापरिच्छिन्नोविद्याप्राप्तेश्चा
णोनिरित्यर्थःअन्नयान्नयहेतुत्वाच्चाविद्वद्विदुषोरस्तितब्रह्मसद्रूपत्वात्प्रयोज्य
त्वंभवतिसेनोद्रष्टृत्वात्प्रयोक्तृरूपपद्यतेकथमन्नयहेतुत्वमित्युच्य
तेयदाह्येवयस्मादेषसाधकएतस्मिन्ब्रह्मणिविशिष्टेअदृश्येदृश्यंनामदृष्टं
विकारोदर्शनार्थत्वाद्विकारस्यनदृश्यंअविकारइत्यर्थःएतस्मिन्नदृश्येऽविकारे
ऽविषयभूतेअनात्म्यशरीरेयस्मादृश्यंतस्मादनात्मंतस्मादनिरुक्तंविशेषोहि
निरुच्यतेविशेषश्चविकारअविकारंचब्रह्मसर्वविकारहेतुत्वात्तस्मादनिरुक्तं

यतएवंतस्मादनिलयनंनीडमाश्रयःननिलयनमनिलयनमनाधारस्तस्मिन्नेतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेसर्वकार्यधर्मविलक्षणेब्रह्मणीतिवा क्षार्थः।अभयमितिक्रियाविशेषणंअभयांइतिलिंगांतरंवापरिणम्यते।अतिष्ठांस्थितिमात्मन्नावंविंदतेलभतेऽथतदासःतस्मिन्नात्मन्यस्मद्धेतोरविद्याकृतस्यादर्शनादभयंगतोभवतिस्वरूपप्रतिष्ठोह्यसौयदाभवतितदान्यान्न्यश्यतिनान्यच्छृणोतिनान्यद्विजानाति।अन्यस्त्यन्यतोभयंभवतिनात्मत एवात्मनोभयंयुक्तंतस्मादात्मैवात्मनोऽभयकारणंसर्वतोहिनिर्भयाब्राह्मणा दृश्यंतेसत्कृत्यहेतुषुतच्चायुक्तमसतिभयकारणेब्राह्मणेतस्मान्नैषामभयदर्शनादस्तितदभयकारणंब्रह्मेति।कदासौनभयंगतोभवतिसाधकोयदानान्य



त्पश्यतिआत्मानिचांतरंभेदंनकुरुतेतदासौनभयंगतोभवतीत्यभिप्रायः।यदाह्यनविद्यावस्थायांहियस्मादेषोऽविद्यावानविद्याप्रत्युपस्थापितंवस्तुतैमिरिकद्वितीयचंद्रवत्पश्यति।आत्मनिचैतस्मिन्ब्रह्मणिउदरमपिअरंअल्पमप्यंतरंछिद्रंभेदंअल्पमप्यंतरंभेददर्शनंकुरुतेभेददर्शनमेवह्यंतरकारणंअल्पमपिभेदंपश्यतीत्यर्थः।अथतस्माद्भेददर्शनाद्धेतोरस्यभेददर्शिनईश्वरान्योमत्तोऽहमन्यःसंसारीत्येवंविदुषोभेददृष्टेरीश्वरादबिभेतिदेवब्रह्मात्मनोल्पमप्यंतरंकुर्वतोभयंभवत्येकत्वेनामन्वानस्यतस्माद्विद्वानप्यविद्वानेवासौ।योयमेकमद्वितीयमात्मतत्त्वंनपश्यतिसर्वंचजगन्मयवद्दृश्यतेतस्माज्जगतोभयदर्शनाऊर्ध्वंतूनंतदस्तिभयकारणंयतोजगद्भिन्नेति।तदेतस्मिन्नर्थेएषश्लोकोभवति।भीषास्माद्वातःपवतेभीषोदेतिसूर्यःभीषास्मादग्निश्चेंद्रश्चमृत्युर्धावति

पंचमइति। वातादयोहिमाहार्हाःस्वयमीश्वराःसंतःपवनादिकार्येष्वायासबहुले
ष्वनियताःप्रवर्त्तंते।तद्युक्तंब्रह्मशास्त्रेसत्यन्यस्मिन्नियमेनतेषांप्रवर्त्तनंतस्माद्यत्ति
भयकारणंतेषांब्रह्मशास्त्रंब्रह्मयतस्तेभृत्याइवराज्ञोस्यब्रह्मणोभयेनप्रवर्त्तंतेात
श्चभयकारणमानंदंब्रह्मतस्यास्यब्रह्मणआनंदस्यैषामीमांसाविचारणान्नवति
किमानंदस्यमीमांस्यमिति।उच्यते।किमानंदोविषयविषयिसंबंधजनितोलौकि
कानंदवदाहोस्विदस्वाभाविकइत्येवमेषानंदस्यमीमांसा।तत्रलौकिकआनं ३२
दोब्रह्मप्राप्त्याध्यात्मिकसाधनसंपत्तिनिमित्तउत्कृष्टःसएषनिर्दिश्यतेब्रह्मानंदा
नुगमार्थी।अनेनहिप्रसिद्धेनानंदेनव्याप्ततविषयबुद्धिगम्यआनंदोनुगं
तुंशक्यते।लौकिकोप्यानंदोब्रह्मानंदस्यैवमात्रा।अविद्यातिरस्क्रियमाणे

विज्ञानेउत्कृष्यमाणायांचाविद्यायांब्रह्मादिनिःकर्मवशाद्यथाविज्ञानं विषयादिसा
धनसंबंधवशाच्चविनाश्यमानश्चलोकेऽनवस्थितोलौकिकःसंपद्यते।सएवावि
द्याकामकर्मापकर्षेणमनुष्यगंधर्वाद्युत्तरभूमिषुश्रोत्रियप्रत्यक्षो
विनाश्यतेशतगुणोत्तरोत्कर्षेणायावद्धिरण्यगर्भस्यब्रह्मण आनंदइति।निरस्तेत्वावि
द्याकृतेविषयविषयिविभागेविद्ययास्वाभाविकःपरिपूर्णएकआनंदोऽद्वैतोनव
तीतिएतमर्थंविज्ञाविष्यन्नाह।युवाश्रुतमवयाः।साधुराशीर्युवाचेतिश्रुतोविशेषणं
युवाप्यसाधुर्भवतिसाधुरप्ययुवाऽतोविशेषणंयुवास्यात्साधुयुवेति।आशीर्नायको धी
तवेदःआशिष्ठआशास्तृतमःदृढिष्ठोदृढतमःबलिष्ठोबलवत्तमःएवमाध्यात्मिकसा
धनंसंपन्नःतस्येयंपृथिवीसर्वावित्तस्यवित्तेनोपभोगसाधनेनहृष्टार्थेनाहृष्टार्थेनच

कर्मसाधनेनदृर्णाराजाष्टथिवीपतिरित्यर्थः।तस्यचयआनंदःसएकोमानुषोमनु
ष्याणांप्रकृष्टएकआनंदःतेयेशतंमानुषाआनंदाःसएकोमनुष्यगंधर्वाणामानंदः
मनुष्यानंदाच्छतगुणेनोत्कृष्टोमनुष्यगंधर्वाणामानंदोभवति।मनुष्याःसंतःकर्म
विद्याविशेषाजंधर्वत्वंप्राप्तामनुष्यगंधर्वाःएवंदेवस्याभूमेरुत्तरस्यामुत्तरस्यांभू
मौश्रुतादविशेषतःशतगुणेनानंदोत्कर्षउपपद्यते।अथमेत्वकामहताश्रुत्राणांमनु
ष्यविषयभोगकामानिहितस्यश्रोत्रियस्यमनुष्यानंदाच्छतगुणेनानंदोत्कर्षोम ३२
नुष्यगंधर्वेणातुल्योवक्तव्यइत्येवमर्थंदेवगंधर्वाजातितःचिरलोकलोकाइति
पित्वविशेषणं।चिरलोकःस्थायीलोकोयेषांपित्रणांतेचिरलोकलोकांश्चाजान
इतिदेवलोकःआजानेजाताआजानजादेवाःस्मार्तकर्मविशेषतोदेवस्थानेषु

ज्ञाताः।कर्मदेवायेवैदिकेनकर्मणाऽग्निहोत्रादिनाकेवलेनदेवानपियंति।देवाश्
तित्रयस्त्रिंशत्रविर्भुजः।इंद्रस्तेषांस्वामीतस्याचार्योबृहस्पतिः।प्रजापतिर्विराट्
त्रैलोक्यशरीरःब्रह्मासमष्टिव्यष्टिरूपःसंसारमंडलव्यापी।यश्चैतेआनंदाना
एकतांगछंतिधर्मश्चतन्निर्मितोज्ञानंचैतद्विषयंअकामहतत्वंचनिरतिशयंस
एषहिरमणगर्भोब्रह्मातस्यैषआनंदः।श्रोत्रियेणाहजिनेनाकामहतेनचस्व
र्वतःप्रत्यक्षमुपलभ्यतेतस्मादेतानित्रीणिसाधनानीत्यवगम्यते।तत्रश्रो
त्रियत्वाहजिनत्वेनियतेऽकामहतत्वंत्वलभ्यतेइतिप्रकृष्टसाधनत्वावगम्प
तेतस्य।अकामहत्वप्रकर्षतश्चोपलभ्यमानःश्रोत्रियप्रत्यक्षोब्रह्मणआनं
दोयस्यपरमानंदस्यमात्रांएकदेशः।एतस्यैवानंदस्यान्यानिभूतानिमात्रा

मुपजीवंतीतिश्रुत्यंतरात्सएषआनंदोयस्यमात्रासमुद्रांभस्इवविष्णुः
त्रविभक्तायचैकतांगताःसएषपरमानंदःस्वाविकावैतत्वात्आनंदानंदिनो
श्रीविभागोत्रातदेतन्मीमांसाफलमुपसंक्रियतेसयश्चायंपुरुषइति।गुहा
यांनिहितःपरमेव्योम्निआकाशादिकार्यैरदृष्टात्मनयांतंतदेवानुप्रविष्टःस
यइतिनिर्दिश्यते।कोसावयंपुरुषेयश्चासावादित्येयःपरमआनंदःश्रोत्रियत्र
त्यक्तोनिर्दिष्टोयस्यैकदेशंब्रह्मादीनिभूतानिस्वरवार्हाएपुपजीवंतिसयश्चासा
वादित्येइतिनिर्दिश्यतेसएकःत्रिभत्रदेवास्यधराकाशौकत्ववत्सयःदेवं
यथोक्तंब्रह्मोत्कृष्टोत्कर्षापकर्षमवैतंसत्यंज्ञानमनंतमस्तीत्येवंवेत्तीत्येवंवित्
।एवंशास्त्रस्यत्रकृतपरमार्थित्वात्सकिमस्माद्योकात्रेत्यदृष्टादृष्टविषयस



मुदायोत्ययंलोकःतस्मादस्माद्योकात्रेत्यत्रत्याद्दृष्टनिरपेक्षोभूत्वाएतंयथाभूतं
तंअन्नमयमात्मानमुपसंक्रमतिविषयजातमन्नमयात्पिंडात्मनोव्यतिरिक्तंनपश्य
तिसर्वंस्थूलन्नूतमन्नमयमात्मानंपश्यतीत्यर्थःततोन्यंतरमेतंप्राणमयंसर्वान्नम
यात्मस्थंअविभक्तं।अथैतंमनोमयविज्ञानमयमानंदमयमात्मानमुपसंक्रमति
।सत्यंज्ञानमनंतंब्रह्मेतियथोक्तलक्षणात्मत्रतिपत्त्यर्थमेवबह्वृवसर्गत्रवेशारसान्न
यसंक्रमणादिपरिकल्प्यतेब्रह्मणिसंव्यवहारविषयेनतुपरमार्थतोनिर्विकल्पेत्र
ह्मणिकश्चिदपिविकल्पउपपद्यते।तमेतंनिर्विकल्पमेवंक्रमेणासंक्रम्यविदित्वा
नविजेतिकुतश्चनान्योयंत्रतिष्ठांविंदतइत्येतस्मिन्नर्थेयेषश्लोकाभवतिसर्वस्यै
वास्यत्रकरणस्यानंदवल्लर्थस्यसंक्षेपतःप्रकाशनायएषमंत्रोभवतियतोयस्मा

न्निर्विकल्पाश्रयोक्तलक्षणाद्वयानंदात्मनोवाचोऽनिधानान्निष्प्रमादिसं
विकल्पवस्तुविषयाणि। वस्तुसामान्यान्निर्विकल्पेऽद्वयेपिब्रह्मणिप्रयोक्तुनिः
प्रकाशनायप्रयुज्यमानत्वात्। अत्राप्याप्रकाशेवनिवर्त्तंतेस्वसामर्थ्याद्धीयंते। न
नइतिप्रत्ययोविज्ञानंतच्चयत्रानिधानंप्रहृत्यंश्रुतीद्रियेप्यर्थतदर्थेचप्रवर्त्ततेप्रका
शनायात्। यत्रचविज्ञानंतत्रवाचःप्रहृत्तिःतस्मात्सहैववाङ्मनसयोरनिधानप्रत्य
ययोःप्रहृत्तिःसर्वत्रतस्माद्ब्रह्मप्रकाशनायसर्वथाप्रयोक्तुनिःप्रयुज्यमाना ३५
अपिवाचोऽस्मादप्रत्ययविषयादनन्निधेयादृश्यादिविशेषणात्सहैवमनसा
विज्ञानेनसर्वप्रकाशनसमर्थेननिवर्त्तंते। तंत्वब्रह्मणआनंदंश्रोत्रियस्याहृजि
नस्याकामहतस्यसर्वैषणाविनिर्मुक्तस्यात्मभूतंविषयविषयिसंबंधविनिर्मुक्तं

स्वात्माधिकंनित्यमविनष्टंपरमानंदंब्रह्मणोविद्वान्यथोक्तेन विधिना नबि
भेतिकुतश्चननिमित्तात्। नाद्वात्। नहितस्माद्विदुषोन्यदस्त्यंतरमस्तिभिन्नंयतोबि
भेतिमनोमयेचोदाहृतोमंत्रोमनसोब्रह्मविज्ञानसाधनत्वात्तत्रब्रह्मत्वमारो
प्यतत्स्तुत्यर्थंनबिभेतिकदाचनेतिनयमात्रंप्रतिषिद्धं। इहात्रैतविद्वे। नबिभे ष
तिकुतश्चनेतिनयनिमित्तमेवप्रतिषिध्यते। नन्वस्तिनयनिमित्तंसाधूपापक्रिया
चानैवं। कथंत्युच्यते। एतंयथोक्तमेवंविदंहवावेत्यवधारणार्थो। नतपतिनो
द्वेजयतिनसंतापयति। कथंह्यनःसाधुकरणंपापक्रियाचनतपतइत्युच्यते
। किंकस्मात्साधुशोभनंकर्मनाकरवंकृतवानस्मीतिपश्चात्संतापोभवति
आसन्नोमरणंकाले। तथाकिंकस्मात्पापंप्रतिषिद्धंकर्माकरवंकृतवानस्मी

ति[illegible]नकरयातनादिदुःखमयात्तापोभवति।तेएतेसाधकरणा
पायक्रियेएवंमेनंतप्रतीयथाऽविद्वांसंतपतः।कस्मात्पुनर्विद्वांसंन्नतपतइत्युच्य
तेसएवंविद्वानेतेसाधसाधुनीएयपापहेतूदृत्यात्मानंस्पृणुतेत्रीणायतिपरमा
त्मनावेनोनेपदपतीत्यर्थः।उनेडएपापेहियस्मैदेवएषविद्वानेतआत्मानंआत्म
रूपेणैवडएपापेस्वेनविशेषरूपेणासतीकृत्वाआत्मानंस्पृणुतएव।कोयए
वंवेदयथोक्तमेवैतमानंदंब्रह्मवेद।तस्यात्मनावेनदृष्टेडएपापेनिवर्त्यतेताप २६
केजन्मारंभकेनभवतःइतीयमेवयथोक्ताऽस्यावद्यौब्रह्मविद्योपनिषन्मर्वा
स्योविद्यास्पःपरमंरहस्यंदर्शितमित्यर्थः परंश्रेयोस्यांनिषण्णमिति।समाप्तानंद
वल्ली।।सत्यंज्ञानमनंतंब्रह्माकाशादिकार्यमन्नमयादितत्पृक्षातदेवानुप्रविष्टं

विशेषवदिवोपलभ्यमानंयस्मात्तस्मात्सर्वकार्यविलक्षणंअदृश्यादिधर्मकमे
वानंदंतदेवाहमितिविजानीयादनुवेशस्यतदर्थत्वात्तस्यैवंविजानतःअन्ना
मुनेकर्मणोजन्मांतरारंभकेनभवतइत्येवमानंदवल्ल्यांविवक्षितोर्थोपरिसमाप्ता
ब्रह्मविद्या।अतःपरंब्रह्मविद्यासाधनंतपोवक्तव्यमन्नादिविषयाणिचोपासनान्य
नुक्तानीत्यतइदमारभ्यते।आरण्यायिकाविद्यास्तुत्यर्थाप्रियायडत्रायवित्रोक्तति
।भृगुर्वैवारुणिःवैशब्दःप्रसिद्धानुस्मारकोभृगुरित्येवंनामाप्रसिद्धोनुस्मर्यतेव
रुणस्यापत्यंवारुणिःवरुणंपितरंब्रह्मजिज्ञासुरुपससारोपगतवान्।अधीहिभ
गवोब्रह्मेतिअनेनमंत्रेण।सचपितात्रिधिवदुपसंन्नायतस्मैडत्रोवाचतद्यथावा
चश्चंत्राणंचक्षुःश्रोत्रंमनोवाचमितिअन्नंशरीरंतदभ्यंतरंप्राणमन्नारंउपस

ब्धिसाधनानि [illegible]चक्रुरादीनीत्येतानि अन्नाम्नजघ्नौकारान्तानि कृत्वा
नूउच्चकार नूतान्येतान्यन्नादीनि। तं नृगुं ह उवाच अन्नस्य लक्षणं किं तत्
। यतो यस्माद्वै इमानि अन्नादिस्तंबमर्यंतानि जायंते अन्नेन च जातानि जीवं
ति प्राणान् धारयंति वर्धंते विनाशकाले यत्र अन्नमतिगछंति अग्निं संविशं
ति तद्विजिज्ञासस्व तद्ब्रह्मेति प्रतिपद्यंते। उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहति नूतानि
तदेतदन्नस्य लक्षणं तमन्नविजिज्ञासस्व विशेषणात्तु मिछस्त्वयदेवं लक्ष ३७
णं अन्नमन्नादिद्वारेण प्रतिपद्यस्वेत्यर्थः। अन्नस्यान्नमिति श्रुत्यंतरात् अन्नो
पलब्धौ कारणमेतानि दर्शयति। स नृगुर्ब्रह्मोपलब्धि कारणं अन्नलक्षणं च कृत्वा
पितुः तपो ब्रह्मोपलब्धिसाधनत्वेनातप्यत। कुतः उनरवुपैष्टस्यैव तपसः साध



नत्वप्रतिपत्तिर्भृगोः। सावशेषोक्तेरन्नादिब्रह्मणः प्रतिपत्तौ द्वारं लक्षणं च
यतो वा इमानीत्याद्युक्त्वानूसावशेषं हि तल्लक्षणं ब्रह्मणो निर्देशात्। अन्य
था हि स्वरूपेणैव ब्रह्म निर्देष्टव्यं जिज्ञासवेऽत्रायेदमित्थंरूपं ब्रह्मेति नचैवं नि
र्दिशात्। किं तर्हि सावशेषमेवोक्त्वानूक्तोनूनंगम्यते साधनांतरमपेक्षते
पिता ब्रह्मविज्ञानं प्रतीति। तपोविशेषप्रतिपत्तिस्तु सर्वसाधकतमत्वात् सर्वे
षां हि नियतसाध्यविद्यानां साधनानां तपएवसाधकतमं साधनमिति हि त्र
सिद्धं लोके तस्मात्त्रिवानुपदिष्टमपि ब्रह्मविज्ञानसाधनत्वेन ततपः प्रतिपेदे नृगुः।
तच्च तपो बाह्यांतःकरणसमाधानं नैर्द्वारकत्वा ब्रह्मप्रतिपत्तेः मनसश्चेंद्रियाणां
चैकाग्र्यं परमं तपः। तज्ज्यायः सर्वधर्मेभ्यः सधर्मपरउच्यत इतिस्मृतेः। सचतप

स्तत्वा।ऽन्नं ब्रह्मेत्युपजानाद्विजानाति।ब्रह्मणो हि तद्विषयो लक्षणोपेतं।कथं अन्नाद्ध्येव खल्विमानि भूतानि जायंते अजातानि जीवंति अन्नं प्रयंत्यभिसंविशंतीति तस्माद्युक्तमन्नस्य ब्रह्मत्वमित्यभिप्रायः।स एवं तपस्तप्त्वान्नं ब्रह्मेति विज्ञाय लक्षणोपपत्त्या च ह्यनरेवं संशयमापन्नो वरुणं पितरमुपससार।अधीहि भगवो ब्रह्मेति।कः ह्यनः संशयहेतुरस्येत्युच्यते।अन्नस्योत्पत्तिदर्शनात्तपसः ह्यनः ३८
ह्यनरूपदेशः साधनमिति ज्ञायत्वावधारणार्थः।यावद्ब्रह्मणो लक्षणं निरतिशयं नित्यवस्तु तया वक्तुं जिज्ञासानिवर्तते तावत्तपएवतेसाधनं तपसैव ब्रह्म विजिज्ञासस्वेत्यर्थः।कुत्रचित्पुनरेवं तपसाऽऽत्मा प्राणादिषु साकल्येन लक्षणं पश्यन्नुच्छनैः शनैरनु प्रविश्य अंते समानंदं ब्रह्म विज्ञातवांस्तपसैव साधनेन भृ

गुस्तस्माद्ब्रह्म विजिज्ञासस्वेत्याबाह्यांतःकरणसमाधानलक्षणं परमं तपः साधनमनुष्ठेयमिति प्रकरणार्थः।अधुनार्ग्यायिकातोपसत्पत्प्रकृतिः स्वेनैव वचनेनाख्यायिकानिह्नमाचष्टे।सैषा भार्गवी वारुणी विदितावरुणेनोक्ता वारुणी विद्या परमे व्योमन्व्यद्दृश्याकाशगुहायां परमानंदेऽवैतेप्रतिष्ठिता परिसमाप्ताऽन्नमयादात्मनोधिप्रवृत्ता।यएवमन्योपितस्यैवसाधनेनानेवक्रमेणानुत्रविद्यानंदं ब्रह्मवेदसएवंविद्वान्प्रतिष्ठानात्प्रतिष्ठित्यानंदब्रह्मणिब्रह्मैवभवतीत्यर्थः।दृष्टंचफलंतस्योच्यते।प्रभूतमन्नमस्येत्यन्नवान्।सत्तामात्रेणतुसर्वोप्यन्नवानितिविद्यायाविशेषोनस्यात्।इत्यतआह एवमन्नमत्तीत्यन्नादोहीत्यभिनिर्भवति।महान्भवति।केनमहत्त्वमित्यतआह प्रजयापुत्रादिनापशुभिर्गोगजाश्वादिभिर्ब्रह्मवर्चसेनशास्त्रदमज्ञा

नादिनिमित्तेनतेजस्वामहान्भवतिकीर्त्यर्थमात्मानुभवप्रचारनिमित्तयाकिंचान्ने
नवारभूतेनब्रह्मविज्ञानंयस्मात्तस्मादुक्तमिवान्ननिंदायातत्स्तुत्यैवंब्रह्मविद्ये
तमुपक्षिपतेव्रतोपदेशोवास्तुतयेवास्तुतिमात्रंचान्नस्यब्रह्मोपलब्ध्युपायत्वात्
प्राणोवाअन्नंशरीरांतरभावात्प्राणस्यायद्यस्यांतःप्रतिष्ठितंभवतितत्तस्यान्नं
भवतीतिशरीरेप्राणःप्रतिष्ठितस्तस्मात्प्राणोन्नंशरीरमन्नादंतथाशरीरमप्यन्नं
प्राणोन्नादःकस्मात्प्राणेशरीरंप्रतिष्ठितंतन्निमित्तत्वात्तच्छरीरस्थितेःतस्मा
न्नरेतउभयंशरीरंप्राणश्चान्नंशरीरंचयेनान्यस्मिन्प्रतिष्ठितंतेनान्नंये
नान्योन्यस्यप्रतिष्ठातेतेअन्नादेतस्मात्प्राणःशरीरंचोभयमन्नमन्नादंचास
एवमेतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठतिअन्नवान्नादआत्मनैवकिंचान्न

वानन्नादोभवतीत्यात्यादिसर्ववत्अन्नंनपरिचक्षीतपरिहरेत्तद्व्रतंसू
र्ववत्स्तुत्यर्थंतदेवंस्तुत्याप्रकृत्यनयापरिगृह्यमाणंपरिक्रियमाणंस्तुतंम
हीकृतमन्नंस्यात्एवंयथोक्तमुत्तरेष्वापोवान्नमित्यादिषुयोजयेत्अग्नि
र्ज्योतिरितिअग्नेर्ज्योतिषोरन्नादगुणत्वेनोपासकस्यान्नवत्कारणंब्रतंत
याचष्टेआकाशोपासकस्यवसतोवसतिनिमित्तंकंचनकंचिदपिनप्रत्याचक्षी
तवसत्यर्थमागतंननिवारयेदित्यर्थःवासेचदत्तेवश्यंत्वशनंदातव्यंतस्माद्यया
कयाचविधयायेनकेनप्रकारेणबह्वन्नंप्राप्नुयाद्बह्वन्नसंग्रहंकुर्यात्यस्मा
दन्नवतोविदांसोन्यागतायान्नार्थिनेकेनैअराधिसंसिद्धमस्मैअन्नमित्याचक्ष
तेननास्तीतिप्रत्याख्यानंकुर्वंतितस्माच्चहेतोर्बह्वन्नंप्राप्नुयादितिसर्वेणसंबंधः

आपि चान्नदानस्य माहात्म्यमुच्यते। यथा यत्कालं त्रयछत्यन्नं तथा तत्कालं त्रयछत्यन्नं तथा तत्कालमेवान्नं त्रत्युपनमते कथमिति तदेवाह। एते वै अन्नं मुरवतो मुरवे त्रथमे वयसि मुरवया वाहत्या प्रजाश्चरः सरमन्यागता यथिनेरा हंसं सिध्यं त्रयछति। त्तिशेषः। तस्य किं फलं स्यादित्युच्यते। मुरवतः सर्वे वयसि मुरवया वाहत्या ऽस्मै अन्नदाया न्नं राध्यते यथादन्नमुपतिष्ठत इत्यर्थः। एवं मध्यतो मध्यमे वयसि मध्यमेनोपचारेण तथा न्ततो न्ते वयसि जघन्येनोपचारेण परिन्नवनत्थैवास्मै राध्यते संसिध्यत्यन्नं। य एवं वेदय एवमन्नस्य यथोक्तं माहात्म्यं वेदत घानस्य यथोक्तं फलमुपनमते इदानीं ब्रह्मण उपासना प्रकार उच्यते। क्षेम इति वाचि क्षेमो ना मोपान्नपरिरक्षणं। ब्रह्म वाचि क्षेम रूपेण प्रतिष्ठितमित्युपास्यं योग क्षेम इति। यो



गो नुपात्तस्योपादानं। तौ हि योग क्षेमौ प्राणापानयोः सतोर्न सिध्यतो यद्यपि तथापि न
नि प्राणापानौ मित्तावेव किं तर्हि ब्रह्म निमित्तौ तस्मा ब्रह्म क्षेमात्मना प्राणापानयो
ः प्रतिष्ठितमित्युपास्यं। एवमुत्तरेषु तनतेनात्मना ब्रह्मैवोपास्यं कर्मणो ब्रह्म निवर्त्त
त्वाच्चरत्नयोः प्रतिष्ठिकर्मात्मना ब्रह्म प्रतिष्ठितमित्युपास्यं गतिरितिपादयोर्विमुक्ति
रितिपादयो। इत्येतामानुषीर्मनुष्येषु नवामानुष्यः समाज्ञाऽऽध्यात्मिकः समाज्ञा
ज्ञानामुन्युपास्यानीत्यर्थः। अथानंतरं दैवीः दैव्यो देवेषु नवा समाज्ञाऽऽनंतोत्तरतिरि
तिहृष्टेहृष्टिरन्नादिकारणत्तमिहेतुत्वा द्धैवैवत्स्यात्मनाहृष्टैव्यवस्थितमित्युपास्यं
पु तथान्येघन्येतनतेनात्मना ब्रह्मैवोपास्यं तथा बलरूपेण विद्युतियशोरूपेण पशुभुज्या
तीरूपेण नक्षत्रेषु प्रजातिरमृतं अमृतत्वप्राप्तिः ब्रह्मेण कृणविमोक्षकारेण आनंदः

स्तवमित्येतत्सर्वमुपस्थनिमित्तंब्रह्मैवतेनतेनात्मनोपस्थेप्रतिष्ठितमित्युपास्यं।
सर्वेष्वाकाशेप्रतिष्ठितमतोयत्सर्वमाकाशेतब्रह्मैवेत्युपास्यंतध्याकाशंब्रह्मणेप
वतस्मात्तसर्वस्यप्रतिष्ठेत्युपासीतप्रतिष्ठागुणोपासनात्प्रतिष्ठावान्भवत्येवं
सर्वेषुपियत्राधीनंफलंतब्रह्मैवतदुपासनात्तद्वान्भवतीतिद्रष्टव्यं।क्रत्यंतराच्च
नंयथायथोपासतेतदेवभवतीति।तन्महइत्युपासीतमहोमहत्त्वगुणवत्तदुपा ४१
सीतमहान्भवति।तन्मनइत्युपासीतमननंमनोमानवान्मननसमर्थोभवति।
तन्नमइत्युपासीतनमनंनमोनमनगुणवत्तदुपासीतनम्यंतेप्रह्वीभवंतिब्रह्मै
उपासीत्रेकामाःकाम्यंतइतिकामान्भोग्यविषयाब्रह्मपरेद्दष्टमित्युपासी
तदब्रह्मवांस्तद्गुणोभवतितद्ब्रह्मणःपरिमरइत्युपासीतपरिम्रियंतेस्मिन्पंच

देवताविद्युद्दृष्टिश्चंद्रमाआदित्योग्निरित्येताअतोवायुःपरिमरःक्रत्यंतरप्रसिद्धेः
सएषएवायंवायुराकाशेनानन्त्याकाशोब्रह्मणःपरिमरस्तमाकाशंवाचात्मा
नंब्रह्मणःपरिमरइत्युपासीतपरिएनंमेवंविदंप्रतिस्पर्द्धिनोद्विषंतोऽद्विषंतोपिस
पत्नायतोन्नवंत्यतोविशेष्यंतेद्विषंतःसपत्नाइतियएनंद्विषंतःसपत्नास्तेम्रियंतेप्रा
णान्रुजंतिकिंचायेचाप्रियाअस्यत्रारव्याअद्विषंतोपितेचंपरिम्रियंते।प्राणोवाअन्न
शरीरमन्नादमित्यारभ्याकाशांतस्यैवकार्यस्यान्नान्नादत्वमुक्तंउक्तंनामकिंतेनातेनै
तन्निंदनंभवति।कार्यविषयएवभोज्यभोक्तृकृतःसंसारोनत्वात्मविषयः।आत्मनिन्नांत्यो
पचर्यते।नचात्मापिपरमात्मनःकार्यंततोयुक्तस्तस्यसंसारइतिनासंसारिणएवत्र
वेशाक्तेःतत्स्रष्टातदेवानुप्रविशदित्यादिकारणस्थेसंसारिणएवपरमात्म
नःकार्येनुप्रवेशःश्रूयंते।तस्मात्कार्यानुप्रविष्टोजीवआत्मापरएवासंसारीस्रष्टानु

त्वाविशादितिसमानकर्तृकत्वोपपत्तेश्चसर्गप्रवेशक्रिययोश्चैकश्चैकर्ता
तेतःकोत्रत्ययोयुक्तःकापिलकाणादादितर्कशास्त्रविरोधइतिचेत्नानतयो
रूक्षान्नावेवेदविरोधेचशांतत्वोपपत्तेःशक्त्युपपत्तिभ्यांचसिद्धमात्मनोऽसं
सारित्वंएकत्वाच्चकथमेकत्वमित्युच्यतेसयश्चायंपुरुषयश्चासावादित्यस
एकइत्येवमादिसर्वश्रुतिवत्अन्नमयादिक्रमेणानंदमयात्मानमुपसंक्रम्ये ४२
त्सामगायन्नास्तेसत्यंज्ञानमित्यस्याऋचोर्थोव्याख्यातोविस्तरेणतद्विचरणम्
तमानंदवल्ल्यांसोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चितेतित्वस्यफलवच वाक्यं
नस्यार्थविस्तारोन्योऽकःकेतेकिंविषयावासर्वेकामाःकथंवासहब्रह्मणासम
श्नुतइत्येतद्वक्तव्यमितीदमिदानीमारभ्यते।तत्रपित्राऽचार्यायिकायां
श्रुतिविद्याशेषभूतायांतयोब्रह्मविद्यासाधनमुक्तं।त्राणादेराकाशांतस्यचका

र्यस्यान्नान्नादत्वेनविनियोगश्चोक्तःब्रह्मविषयोपासनानिचासर्वेकामाःप्रति
नियतानेकसाधनसाध्याआकाशादिकार्यनेदविषयाएतेदर्शिताःएकत्वेऽनेक
मकामित्वानुपपत्तिःनेदंजातस्यसर्वस्यात्मभूतत्वात्।तत्रकथंयुगपद्ब्रह्मस्वरूपे
णासर्वान्कामानेवंविद्समश्नुतइतिउच्यतेसर्वात्मत्वापत्तेःकथंसर्वात्मत्वापत्तिरि
त्याहपुरुषादित्यस्यात्मैकत्वविज्ञानेनापोह्योत्कर्षापकर्षावन्नमयाद्यात्मनोऽवि
द्याकल्पितानुक्रमेणसंक्रम्यानंदमयांतात्सत्यंज्ञानमनंतंब्रह्माद्यशरीरादिधर्मकंस्वा
भाविकंज्ञानंदमजमश्नुतमन्नयमवैतंफलंश्नुतमापन्नइमाल्लोकान्भूरादीननुसं
चरन्नितिव्यवहितेनसंबंधःकथमनुसंचरन्कामान्नीकामतोन्नमस्येतिकामा
न्नी।तथाकामरूपाण्येस्येतिकामरूप्यनुसंचरन्सर्वात्मत्वेनइमाल्लोकानात्मत्वेना

नुभवन्। किमेतत्सामसमत्वाब्रह्मसर्वानन्यरूपंगायन्शक्नुयन्नात्मैकत्वंत्रय्या
यन्लोकात्रयहार्यंतद्विज्ञानफलंच अतीवकृतार्थत्वंगायन्नास्तेति छति। कथं
हावुहावुहावुअहोइत्यस्मिन्नर्थेत्यंतविस्मयरव्यापनार्थो। कःपुनरसौविस्मयः
उच्यते। अथैतआत्मानिरंजनोयिसन्नहमेवान्नमन्नादश्चकिंचाहमेवचश्लोकऋ
दन्नान्नादयोसंघातस्यकर्त्रचेतनावान्। अन्नस्यैवचापरार्थस्यान्नादार्थस्यस ४३
तोनेकात्मकस्यपारार्थ्येनहेतुनासंघातकृत्। त्रिरुक्तिर्विस्मयख्यापनार्था। अ
हमस्मिन्नवामिप्रथमजाःप्रथमोत्पन्नःऋतस्यसत्यस्यमूर्त्तामूर्त्तस्यास्याजगतो
देवेभ्श्चपूर्वंअमृतस्यचनाभिरमृतत्वस्यनाभिर्मध्यंमत्स्यमृतत्वंप्राणिनामि
त्यर्थः। यःकश्चिन्मामन्नमन्नार्थिन्सोदद्यातिप्रयछतिअन्नात्मनाब्रवीतिसयइद्

इत्यमेवमविनिष्ठंयथाभूतंआवाःअवतीत्यर्थः। यःपुनरन्योमामेवाऽर्थिभ्यःकाले
प्राप्तेऽन्नमत्तितमन्नमदंतंअहंअन्नमेवसन्प्रत्यपि। अत्राहएवंतर्हिविद्मोमिसर्वा
त्मत्वप्राप्तेर्मोक्षादस्तुसंसारएवयतोमुक्तोप्यहमन्नभूतआइःस्यमन्नस्यैवामात्मे
षीःसंव्यवहारविषयत्वात्सर्वकामाद्यानस्य। अतीत्यायंसंव्यवहारविषयमन्नान्ना
दादिलक्षणमविद्याकृतंविद्ययाब्रह्मत्वमापन्नोविद्वांस्तस्यनेवद्वितीयंवस्त्वंतरमस्ति
यतोविद्मेतिअतोनज्ञेतव्यंमोक्षात्। एवंतर्हिकिमिदमहमन्नमहमन्नादइत्युच्यते। यो
यमन्नान्नादादिलक्षणःसंव्यहारःकार्यभूतःसेसंव्यवहारमात्रमेवनपरमार्थव
स्तुसएवंभूतोपिब्रह्मनिमित्तोब्रह्मव्यतिरेकेणासन्नितिकृत्वाकार्यस्यब्रह्मभाव
स्यस्तुत्यर्थमुच्यतेऽहमन्नमहमन्नमहमन्नादोमहमन्नादइत्यादि अतोन्नयादिदो

षगंधोप्यविद्यानिमित्तोऽविद्योछेदाब्रह्मभूतस्यनास्तीत्याहब्रह्महंविध्वंसमस्तंभुव
नंभूतैःसंभजनीयंब्रह्मादिभिःभवंतिवाऽस्मिन्भूतानीतिभुवनंअभयभवांभानि
भवामिपरमेश्वरेणस्वरूपेण।स्तुवर्णनउपमार्थेस्तुवरादित्यआदित्यइवसकृद्वि
भातमस्मदीयंज्योतिःप्रकाशःइतिवह्नीक्षयविहिताउपनिषत्परमात्मज्ञानंतासे ४४
तांयोक्तामुपनिषदंशांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्ये
त्यायएवंवेदतस्यैवंफलंयथोक्तमोमितिसतत्र्यष्टैष्टुसंख्येब्दैतैत्तिरीयार्थवर्ण
नां।लघुआरब्धामिमांयत्नादलिखन्मधुसूदनः॥ ॥इतिश्रीगोविंदभगवत्पूज्यपा
दशिष्यस्यपरमहंसपरिव्राजकाचार्यस्यशंकरभगवतःकृतौतैत्तिरीयोपनिष
द्भाष्यंसंपूर्णम्॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥संवत्१८३८

शके७०३प्रवर्त्तमानेभाद्रपदसुदी१०सौमवासरेबाडोलीवास्तव्यजोशी७
वनस्तुतदंशामेनलिखितं॥ ॥नवायरावास्तव्यउपाध्यायांणदेवस्तुतनांना
म्नाश्यऽनार्य॥ ॥यत्रशंभुस्तकंत्रक्षताक्षरांलिखितंमया॥यदिशुद्धमशुद्धंवा
॥०॥०॥ममदोशोनदीयते॥०॥०॥०॥०॥०॥